CC-0. Digitized by eGangotri and MIDF- Delhi

# कृष्णागारोज्जीवनम्

## नाटकम्

प्रा.डा.विष्णुप्रसादः देवकोटा

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः त्रिंशत्तमं (३०) प्रकाशनम्

# कृष्णागारोज्जीवनम् नाटकम्

रचनाकारः

प्रा. डा. विष्णुप्रसादः देवकोटा

प्रकाशकम्
जयतु संस्कृतम्
नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकस्य नाम : कृष्णागारोज्जीवनम्

रचनाकारः : प्रा. डा. विष्णुप्रसादः देवकोटा

प्रकाशकः- : जयतु संस्कृतम्, नेपालः ।

प्रकाशनमितिः- : आषाढस्य ११ दिनाङ्के
(नेपाले समायोजितस्य एकोनविंशतितमस्य
विश्वसंस्कृतसम्मेलनस्य (२०८२।३।१२-१६) शुभावसरे) ।

प्रकाशनप्रतिः- पञ्चशतम्

सर्वाधिकारः- रचनाकारे

मूल्यम्- रूप्यकाणि- ४००/-

मुद्रणालयः- किशोर अफसेट प्रेस प्रा. लि.

ISBN : 978-9937-9491-9-4

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्म-राजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं बिभर्त्ति । एवञ्च २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्-छात्रावासस्य वाग्रे स्मारकस्तम्भः स्थापितः ।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम् । अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः । अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ । नैपालिक्याः संस्कृतेः सभ्यतायाश्च संरक्षणार्थं गोष्ठी-प्रशिक्षण-कार्याशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया ।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतमिति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते । एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति । लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति । नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालयेऽन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासा जायमानाः सन्ति । द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै च संस्थेयं सक्रिया वर्तते । उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरूका अस्ति । संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्यपर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति । १. पं. भीमकान्तपन्थी (२०५६, जगदम्बिकावैभवं महाकाव्यम्) २.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्यम्), ३. डा हरिहरशर्मा अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४. प्रा.डा. माधवभट्टराई (२०५८), सत्यशाइ-चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधवढकालः (२०६०) लिच्छविकालिकाना-मभिलेखानां साहित्यिकं परिशीलनम्), ६. चिकित्सको गोपाल-वैद्यः, किंजल्कः (२०६१ हिमाद्रिमहिमा (काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचारः सानुवादः) ८. प्रा.डा. टीकारामोऽधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६, श्रीरामशरणं मम, (काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (कविता), ११ प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२.प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३,गतो मदीयो ननु कुत्र देशः, संस्कृतभारतीगौरवम् ), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च)), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश) १६.आचार्य पूर्णचन्द्रढुङ्गेलः, २०७९, देवाधिदेवमहादेव-श्रीनीलकण्ठमहाकाव्यम् ।

संस्कृतवाङ्मयस्य सेवाया आधारेण संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति । तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः । २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ । (खेमराजकेशवशरणः, तस्य काष्ठमण्डपं समागन्तुमशक्यत्वात् उपाध्यक्षो विष्णुप्रसाददेवकोटा, सचिवो नवराजकट्टेलश्च, देवघट्टं गत्वा तस्मै सम्मानं समर्पितवन्तौ ।) २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः(तन्त्रन्यायविद्याकेशरी), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरी), प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरी) च सम्मानिताः । २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसः सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरी), प्रा.डा.



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रामचन्द्रगौतमः (धर्मशास्त्रविशारदः), प्रा.डा. गोविन्दचौधरी (न्यायविद्याकेशरी), प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः) ।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति अस्मत् प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ खीष्टाब्देअष्ट्रलियादेशे अष्टादशतमं सम्मेलनं सम्पन्नम्। तत्र सञ्जातेन सम्मेलनेन २०२४ तमे खीष्टाब्दे नेपाले तादृशसम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य सम्पादनायात्र एका संयोजनसमितिश्च सङ्घटिता समासीत् । संस्कृतविश्वविद्यालयेन तद्व्यवस्थापने विलम्बो विहितः। अतः प्रयासान्तरेण २०८२ वैक्रमाब्दस्य आषाढमासस्य १२-१६, (सन् २०२५ जून २६-३०) दिनाङ्के विश्वसंस्कृतसम्मेलनं जायमानमस्ति । अस्य समायोजने जयतु संस्कृतमिति संस्थाया महती भूमिकास्ति।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिर्महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतोऽस्ति।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्योद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति। संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थरचना-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यन्ते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकाणां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि सन्ति। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। कट्टेलस्य 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च। एवमेव संस्कृतनाटिकाकौस्तुभनामा रूपकसङ्ग्रहश्च प्रकाशितः।

नेपालेऽनया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितम्। २०७६ वैक्रमाब्दे कोभिड-१९ व्याधिकारणेन संसारोऽवरुद्धः। वयं नेपालिनश्च स्वस्यैव गृहे पिनद्धाः। तदवसरे अनया संस्थया सप्तप्रदेशेषु (२०७७ वैक्रमाब्दे) 'नेपालस्य साधारणशिक्षायां संस्कृतस्य आवश्यकता' इति विषये जूमगोष्ठी विहिता। तदनु सप्तप्रदेशेषु (२०७७-२०७८) पञ्चदशदिवससंस्कृतभाषाप्रशिक्षणं विहितम्। सहस्रशो जनैः प्रशिक्षणे भागो गृहीतः। तदैव संस्कृतलोकभाषाभियानस्य महत्त्वं स्थापितम्। एवञ्च २०७८ वैक्रमाब्दे सम्पन्नायां राष्ट्रियजनगणनायां १४९०० जनताभिः संस्कृतं मम मातृभाषा इति पञ्जीकृतम्। षट्सहस्रेण (६०००) जनताभिः संस्कृतं मम द्वितीया भाषा इति, १,३५,००० जनताभिः संस्कृतं मम पूर्वजानां भाषा इति पञ्जीकृतमस्ति। नेपाले १२४ भाषाः पञ्जीकृताः सन्ति तेषु संस्कृतभाषायाः क्रमः ५६ तमेऽङ्केऽस्ति। अनेन प्रयासेन अधुना संस्कृतं नेपालस्य राष्ट्रभाषासु स्थापितं वर्तते।

जयतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भूमिकास्ति । जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाणा अग्रे गच्छन्ती वर्तते इति नेपालस्य संस्कृतप्रेमिणः जानन्त्येव ।

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते । तद्वद् दाहालस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति । रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति । प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति । संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते ।

पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिताः । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति । संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति ।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया तासां प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनायै एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां तासां प्रोत्साहनाय च नारीप्रतिभापुरस्कारं स्थापितवती । एवमेव काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्च स्थापितवती ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

प्रकृतनाटककारस्य परिचयः- नाटककारः प्रा.डा. विष्णुप्रसाददेवकोटा (२००८, ज्येष्ठमासस्य २८ दिनाङ्के) संस्कृतव्याकरणस्य आधिकारिको विद्वान् वर्तते । अनेन नेपालसंस्कृतविश्वविद्यालये पञ्चत्रिंशत् वर्षाणि यावत् अपाठि । सोऽयं सूरिः गोरखाजनपदाभिजनो वर्तते । गोरक्षजनपदस्य पालुङटारनगरपालिकायाः ३ वडा निवासी, लिगलिग राउतेपानीग्रामे पण्डितस्य परिवारे समजनि देवकोटा । गृहे एव समधीत्य अष्टमकक्षातः भगवतो रामचन्द्रस्य जन्मभूमिमयोध्यां सम्प्राप्य पठितवान्, तत्रैव स्थित्वा शास्त्रिकक्षां समुत्तीर्य भगवतो भूतभावनस्य शङ्करस्य नगरीं वाराणसीं सम्प्राप्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः संस्कृतव्याकरणविषये (सन् १९७४ खीष्टाब्दे) आचार्यकक्षां समुत्तीर्णवान् । तथैवानेन विदुषा (१९७७ खीष्टाब्दे) साहित्यविषयेऽपि आचार्योपाधिर्गृहीतः आसीत् । तथैवानेन त्रिभुवनविश्वविद्यालयतः शिक्षाशास्त्रिपरीक्षापि समुत्तीर्णा ।

अछ्रामजनपदस्य देवकोटात समागतः । देवकोटपूर्वजाः १४।१५ शताब्दतः देवकोटोपाह्वा गोरखाजनपदे उपस्थिताः दृश्यन्ते । पश्चिमनेपाले एतेषां पूर्वजानां इतिहासः प्राचीनतरो विद्यते । निधिः निधुदेवकोटा वा एव अस्य दृष्टः गोरखाजनपदीयो वंशः । तस्य पुत्रः वेणुदत्तः, तस्य पुत्रः मित्रलालः । मित्रलालस्य ज्येष्ठसुपुत्रः बद्रीप्रसादः, कनिष्ठः तुलसीप्रसादश्च । तुलसीप्रसादस्य चत्वारः पुत्रा अभूवन् । तेषु तृतीयो लोकनाथदेवकोटा समजनि । तस्य ज्येष्ठः श्रीनिवासः, मध्यमः विष्णुप्रसादः, कनिष्ठः पुत्रो मधुविलासदेवकोटा अजायन्त । नाटककारस्य विष्णुप्रसादशर्मणः द्वौ पुत्रौ सन्देश-सन्तोषौ स्तः ।

देवकोटामहोदयेन अयोध्याजनपदे हनुमत्-संस्कृत-महाविद्यालये (हनुमानगढीपरिसरे सन् १९७४ तः) पाठयितुं समारब्धः । तदनु नेपालं समागत्य रानीपोखरीसंस्कृतमाध्यमिकविद्यालये पाठितवान् । ततश्च प्रा. देवकोटा २०३६ माघमासात् तात्कालिकसंस्कृताध्ययनसंस्थानेन समायोजितां लिखितपरीक्षां समुत्तीर्य बिजौरीदाङस्थं जनतासंस्कृतविद्यापीठं सम्प्राप्य पाठयितुं समारेभे ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पाठयतानेन २०५२ तमे वैक्रमाब्दे तात्कालिकमहेन्द्रसंस्कृतविश्वविद्यालयतः **'प्रक्रियाकौमुदी-सिद्धान्तकौमुद्योः समीक्षणात्मकमध्ययनम्'** इति विषयमवलम्ब्य शोधकार्यं कृत्वा विद्यावारिधिरित्युपाधिर्लब्धः ।

प्रतिभाशाली देवकोटा छात्रजीवनादेव लेखनकार्ये प्रवृत्तोऽभवत् । तदैव अनेकासु प्रतियोगितासु भागं गृहीत्वा स्वमग्रपङ्क्तौ स्थापयति स्म । प्राध्यापकजीवनेऽपि अनेन भाषाद्वयेनानेकेषु विषयेषु लेखाः समीक्षाः, कार्यपत्राणि च व्यलेखि । एवञ्चानेन नेपालसंस्कृतविश्वविद्यालयस्य परीक्षानियन्त्रको भूत्वा, विश्वविद्यालयस्य प्राज्ञिकपरिषदः सदस्यो भूत्वा, व्याकरणविषयसमितेः सदस्यो भूत्वा च अनेकानि कार्याणि सम्पादितानि । जयतु संस्कृतम् इति संस्थायाः दाङमण्डलस्य अध्यक्षो भूत्वा केन्द्रीयसमितेश्च उपाध्यक्षः सन् अनेकानि कार्याणि कृतवान्, अनेकानि ग्रन्थरत्नानि सम्पादितवाँश्च ।

जयतु संस्कृतम् संस्थातः अस्य कवेः **नेपालगौरवं महाकाव्यं** (२०७८ वैक्रमाब्दे) प्रकाशितमस्ति । अस्मिन् काव्ये १८ सर्गाः ११।१२ शत श्लोकाः रचिताः सन्ति । काव्यमिदं नेपालस्य गौरवगाथां गायति । नेपालस्य प्राकृतिकसौन्दर्यस्य, हिमवतः, सरितां, शैलानां वर्णनं कृत्वा गुरुगोरक्षनाथस्य रहस्यमयं जीवनं, बुद्धस्य जीवनं, पृथ्वीनारायणशाहस्य जीवनं नेपालैकीकरणं वर्णयित्वा कविः नेपालमातुर्गौरवगाथां प्रकाशयति । अस्य कवेः संस्कृतभाषायां **गोरखकृपादृष्टिः, नैपालैकीकरणम्, सुगताभयदानम्** इति त्रीणि लघुनाटकानि प्रकाशितानि सन्ति संस्कृतनाटिकाकौस्तुभे । संस्कृते एव. निपातोपसर्गविमर्शः अनुसन्धितो ग्रन्थश्च राजते । नेपालीभाषायां व्याकरणप्रवेशिका (सहलेखन) (भारद्वाजगोत्रीय देवकोटाहरूको), **कुलदेवतापूजापद्धतिः** (२०७९, सहलेखन), **चाडपर्व र संस्कृति** (२०८०), **भाषा, साहित्य र विद्वत्संस्मरण**(२०८१) इत्यादयो ग्रन्थाः प्रकाशिताः सन्ति । संस्कृते प्रकाश्यमानकृतयः **निपातोपसर्गविमर्शः, 'प्रक्रियाकौमुदी-सिद्धान्तकौमुद्योः समीक्षणात्मकमध्ययनम्' व्याकरणशास्त्रस्य वैय्याकराणानाञ्च इतिवृतम्, साहित्यशास्त्रस्य साहित्यशास्त्राणाञ्च इतिवृत्तम् सन्ति। नेपालीभाषायां हितोपदेश तथा पञ्चतन्त्रका रोचक र शिक्षाप्रद कथाहरू** (२०८२), इत्यादयश्च सन्ति ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सम्पादने च नेपाले सम्पन्नस्य विद्वत्सम्मेलनस्य संस्मरणग्रन्थः (२०५३), नेपालसंस्कृतविश्वविद्यालयस्य अनुसन्धानात्मिका **ऋतम्भरा** पत्रिका वर्तते। जयतु संस्कृतम् इत्यस्य **संस्कृतकवितासङ्ग्रहस्य** प्रथमद्वितीयभागौ, जयतु संस्कृतम् पत्रिका, जयतु संस्कृतम् इतिसंस्थायाः **संस्कृतनाटिकाकौस्तुभः,** अन्यानि च ग्रन्थरत्नानि सम्पादितानि।

अनेन विदुषा महेन्द्रविद्याविभूषणं, दीर्घसेवापदकं, शिक्षादिवसपदकञ्च लब्धानि। अनेन सूरिणा भारत-अरबइमिरेट- कतार-अमेरिकादिदेशानां विभिन्नसन्दर्भे भ्रमणमपि विहितमस्ति।

अथ च प्रकृतनाटकलेखने तथैव नाटकानां प्रकाशनाय कृतभूरिपरिश्रमाय च प्रा.डा. विष्णुप्रसादशर्मदेवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि। अथ च नाटकस्य अध्ययनं, संशोधनं, समीक्षां च कृतवान् प्रा.डा. नूरापतिपोखेलः। एतस्य भूरिपरिश्रमस्य कृते अस्मै विद्वद्वराय कृतज्ञतामाभारञ्च समर्पयामि। स्वयञ्च कर्मफलम् इति एकविंशति र्लघुनाटकानि विरचय्य नाट्यसाहित्यविवृद्धये भूरिश्रमं कुर्वाणः संस्थायाः सदस्यसचिवः प्रा.डा. नवराजकट्टेलोऽपि धन्यवादार्हः। स अस्य प्रकृतनाटकस्य समीक्षाञ्च कृतवान्। अस्यैव सदस्यसचिवस्य सक्रियतायां नाटकानां लेखनं, सङ्कलनं, सम्पादनं, प्रकाशनञ्च सम्भवम्। अनेनैव विदुषा पौनःपुन्येनं विदुषो निगद्य च रचनाः सङ्कलिताः। अत एते धन्यवादार्हाः। एवञ्चास्य नाटकस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रणयिनो धन्यवादार्हाः सन्ति।

जयतु संस्कृतम्।

अध्यक्षः
**डा. बद्रीपोखेलः**
जयतु संस्कृतम्
अनामनगरम्,
काष्ठमण्डपम्- ३२।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# 'कृष्णागारोज्जीवनम्' इत्याख्यस्य नाटकस्याधारभूमयः

नाहं नाटकलेखने प्रवीणः। अथापि साहसमालम्ब्य प्रकृतं नाटकं नवाङ्कात्मकं लिखितं मनोयोगेन। आशासे नाटकाभिज्ञैस्तदनुमोदयिष्यते। इतः पूर्वं मया त्रीणि एकाङ्कनाटकानि लिखितानि। तान्यपि जयतु संस्कृतमिति संस्थाया उद्देश्यानुकूलतया तस्याः सचिवस्य प्रा.डा.नवराजकट्टेलमहाभागस्यानुराधेन च लिखितानि। कट्टेलमहाभागा हि संस्कृतभाषायामेकाङ्कानां (लघुनाटकानाम्) बृहन्नाटकानाञ्च स्वयं लेखकाः, अन्येषामपि विदुषामुत्प्रेरकाः। एतन्नाटकस्य कथानकं मदीये नेपालगौरवमित्याख्ये महाकाव्येऽपि प्रसङ्गतः समागतं वर्त्तते। अस्य कथानकस्य प्रकृतनाटकविषयवस्तुनश्च ऐतिहासिकत्वं पौराणिकत्वञ्च प्रसिद्धमेव। दाक्षिणात्यायाः कृष्णाया नद्या वर्णनेषु पुराणेषु भारतीयेषु चेतिहासेषु तस्य वर्णनविषयत्वात्।

## १- नाटकविधाया महत्त्वम्

संस्कृतवाङ्मयस्य हिन्दीनेपाल्यादिसाहित्यस्य चान्यविधानामपेक्षया प्रभावशालिनी विधा नाटकविधा मन्यते। अस्या नाटकविधायाः सर्वास्वन्यासु साहित्यिकीषु विधासु अतिशायित्वमभिनेयत्वेन कारणेन रङ्गमञ्चीयगुणेन च वर्त्तते। अभिनेयत्वाभावे तु इतरविधासाधारण्यमस्या अपि विधायाः। सामान्यतया काव्यं द्विधा विभक्तं मन्यते-श्रव्यकाव्यं दृश्यकाव्यञ्च। कविता-निबन्ध-कथोपन्यासादिकं श्रव्यकाव्यं हि केवलेन श्रवणेन पठनेन वा बुध्यते-तद्द्वारा हचानन्दानुभूतिर्भवति पाठकानाम्, दृश्यकाव्यञ्च तस्य श्रवणेन (पठनेन) दर्शनेन च परनिर्वृतिर्भवति पाठकानामित्युभयोर्भिन्नत्वम्। तदेव नाटकं नाम तदेव च दृश्यकाव्यविशेषः।

लक्षणग्रन्थेषु दृश्यकाव्यञ्च दशप्रकारकं मन्यते। स चायं दशप्रकारः-नाटकम्, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनञ्चेति। रूपकस्यैको भेदो नाटकमिति। विश्वस्मिन् विश्वे नेपाले भारते च सँस्कृतनाटकानां रूपकविधानां वा अत्यल्पत्वं राजते। तदल्पत्वमपचेतुं संस्कृतभाषायां नाटकैकाङ्गिनाटकलेखने इदानीं नेपाले जागरूकता जागर्त्ति। अत्र जागरणे जयतु संस्कृतमिति संस्थापि कारणमस्ति। सा हि तल्लेखने संस्कृतज्ञान्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदुषो जागरयति। अस्य जागरणस्य कारणेन कतिपयमासानन्तरं नाटकानामेकाङ्किनाञ्च संख्या वर्धिष्यत एव।

## २- नाटकप्रणयने स्रोतश्चिन्तनम्

श्रूयते इन्द्रादिदेवा भगवन्तं ब्रह्माणं गत्वा तमागृहीतवन्तः **क्रीडनीयकमिच्छामो दृश्यं श्रव्यञ्च यद्भवेत्** इति। एतत्कथनस्य तात्पर्यमस्ति नाटकं खेलनस्य मञ्चनस्य वा वस्तु विद्यते। एवं मञ्चनपूर्वकमुपदेशप्रदानं विश्रान्तिवितरणं मनोरञ्जनप्रदानञ्च नाटकस्य वैशिष्ट्यमिति। प्रार्थनामिमामाश्रित्य ब्रह्मा नाट्यवेदं प्रादुर्भावयामास। तञ्च नाट्यवेदं भरतं प्रदाय तद्द्वारा प्रचारयामास व्याख्यापयामास च। अत्र भरताचार्यो भारतीमारभटीं सात्वतीञ्च वृत्तिं रचयामास। अत्राचार्येण बृहस्पतिना कौशिकी वृत्तिर्वर्धिता। एतादृशस्य नाटकस्य तत्प्रवृत्तेर्वा समुद्भव ऋग्वेदतः समजायत। अत्र प्रमुखस्य नाटकतत्त्वस्य संवादस्य दृढा उपस्थितिर्दृश्यते। अत्र विश्वामित्रनद्योरिन्द्रमरुतोः पुरुरवोर्वश्योर्यमयम्यो-रगस्त्यलोपामुद्रयो-र्याज्ञवल्क्यमैत्रेयचोः संवादा दृश्यन्ते। तत्र तन्मयचः सूक्तयः सन्ति पठिताः। एतन्नाटकमूलत्वं मन्तव्यमेव। मैक्समूलरोऽपि संवादानिमान् तन्मूलानि स्वीकरोति।

## ३- नाटकपरिचयस्तल्लक्षणञ्च

नाटकाचार्यस्य भरतस्यानुसारेण अवस्थानामनुकरणमेव नाटकं भवति। अतस्तेनोक्तम्-अवस्थानुकृतिर्नाटचमिति। अवस्थापदस्य तात्पर्यमस्ति-जीवनस्य विभिन्नानां समानां विषमानाञ्च परिस्थितीनां समाधानपूर्वकं जीवननिर्वाह इति। अत्रैव जीवनकलां शिक्षयति नाटकम्। अस्य प्रत्यक्षस्य जगतोऽतिरिक्तमपि जगद्वर्त्तते काव्यरूपम्। यत्र हि कल्पनाशीलो रचनाकारो नाटककारो वा नवीनस्य काव्यजगतः सृष्टिं करोति। एतादृश्येव रचना नाटकरचना भवति। नाटककलायाश्चरमा सफलता तदैव भवति यदा दर्शका अवास्तविकानामारोपितानां वा नाटकपात्राणां तत्कथनानाञ्च यथार्थत्वं मन्यन्ते। तदा दर्शकानामनुकार्यैः सह साधारणीकरणं जायते। जीवनस्य विविधानां कियाकलापानामनुकरणमपि नाटकमुच्यते। लोकत्रयस्यानुकरणं गुणत्रयस्य समूहश्च नाटकमुच्यते। नृत्यस्य गीतस्य सदुपदेशस्य चेदं खनिर्भवति। एवं साहित्यिकविधासु नाटकविधेयं लोकशिक्षादृष्ट्या प्रभावकारिणी भवति।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मानवजीवने नाटकस्यावश्यकतां वेदा एव प्रतिपादयन्ति । तत्स्रोतांसि च स्वयं भवन्ति । नाटकस्य विषयवस्तु उपदेशादिकञ्च ऋग्वेदात् प्राप्यते, सामवेदात् गीतानि गृहचन्ते,यजुर्वेदाच्च नाटकस्य प्रमुखं तत्त्वमभिनयो गृहचते, अथर्ववेदाच्च रसादयो गृहचन्ते । तदुक्तं भरतेनैव-

**जग्राह पाठचमृग्वेदात् सामतो गीतमेव च ।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥**

(भरतनाटचशास्त्रम् १।१७)

एवञ्च केषामपि सामाजिकविषयवस्तूनां तदुपदेशानां गीताभिनयरसादीनां समूहो नाटकं भवति ।

विभिन्नरुचिमतां सर्वेषामेव जनानां कृते नाटकं खलु रुचिकरं मनोरञ्जकञ्च भवति । तत्र कारणं प्रतीयते सर्वासां कलानामुपस्थितिस्तत्र भवति । अतएव नाटकमिदं प्रशंसति तदभिज्ञो भरत एव-

**न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला ।**
**न तद्योगो न तत्कर्म नाटचेद्रस्मिन् यन्न विद्यते ॥** (भरतना.१/११६) इति

नाटकस्य सार्वभौमस्याकर्षणस्य सदुपदेशकस्य च सत्त्वादेव इदानीमुच्चशिक्षायां तस्य पठनपाठनयोर्व्यवस्था विहिता विलसति । नाटकप्रदर्शनेन तत्पठनपाठनाभ्याञ्च तत्पाठकदर्शका निम्नलिखितैस्तथ्यैर्विभूषिता भवन्ति-

क-तत्पाठकैर्दर्शकैश्चावसरानुसारेण सदाचरणानि प्रदर्शयितुं शक्यन्ते ।
ख-मानवस्वभावानां तच्चरित्राणाञ्च ज्ञानं भवति ।
ग-अभिव्यक्तिसामर्थ्यार्जनमाचारविचारज्ञानञ्च भवति ।
घ-दुःखदायामपि परिस्थितौ लक्ष्यसाधने सामर्थ्यार्जनयोग्यता समायाति ।
ङ-रामादिवद् वर्त्तितव्यं न तु रावणादिवदिति शिक्षादिकञ्च समधिगम्यते ।

## ४- नाटकतत्त्वानि

नाटके न्यूनतोऽपि अष्टौ तत्त्वानि भवन्ति । तानि च

क- कथानकं विषयवस्तु वा । इदञ्च कुतूहलतापूर्णं रोचकञ्च भवेत् ।

ख- नायकः । नाटकस्य नायकेन लोकप्रसिद्धेन गुणवता धीरोदात्तेन च भाव्यम् । प्रकृतनाटके कृष्णागारो नायको नायकगुणानां सत्त्वात् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग- संवादः। स च विशेषेण स्वगतः परगतश्च भवति। नाटके यत् स्पष्टरूपेण कथ्यते सर्वोद्रपि दर्शकस्तच्छ्रोतुं शक्नोति सः संवादः प्रकाशमित्युच्यते यदात्मानं कथ्यते, मनस्येव कथ्यते तत्स्वगतः संवादो भवति। तेन च सामाजिकेन संक्षिप्तेन प्रभाविणा च भाव्यम्। संवादेन च नाटके गतिशीलता समानीयते।

घ- द्वन्द्वविधानम्- पात्राणां संवाद एव द्वन्द्वानां विधानं विधत्ते। द्वन्द्वविधानमेव नाटकेद्रसाधारण्यमानयति। द्वन्द्वविधानानि नाटकस्य प्राणा भवन्ति। आन्तरिकस्य बाहचस्य वा द्वन्द्वविधानस्य सफले प्रयोगे एव नाटकस्य साफल्यं मन्यते।

ङ- भाषा शैली- नाटकस्य भाषा नाटककारस्य शैली च नाटकमाकर्षकं विधत्ते। प्रवाहशीला व्यावहारिकी च भाषा शैली च नाटकं जनाकर्षकं सम्पादयति। भाषया स्तरीयया पात्रानुकूलया च भाव्यम्।

च- परिवेशः- परिवेशो नाम वातावरणं भवति। वातावरणेनापि नाटकं प्रभाव्यते।

छ- उद्देश्यम्- मनोरञ्जनसम्पादनं शिक्षाप्रदानं प्रभावसम्पादन-मयथार्थताया माध्यमेन यथार्थताधिगतिश्च नाटकस्योद्देश्यानि भवन्ति।

ज- अभिनेयता- अभिनेयतैव साहित्यिकीभ्योद्रन्याभ्यो विधाभ्यो नाटकविधामलग्नां विदधाति। अभिनयश्च प्रकारचतुष्टयात्मको भवति- आङ्गिको वाचिकः सात्त्विक आहार्यश्च। आहार्यो नाम वेशभूषादिभिःकृतोद्रभिनयः। अनेन प्रकारचतुष्टयेनाभिनयो विशिष्टो विधीयते। पौरस्त्यं नाटकं सुखान्तं भवति पाश्चात्त्वञ्च दुःखान्तमपि। नाटके न्यूनतोद्रपि पञ्च अधिकतश्च दश अङ्का भवन्ति। प्रकृतं मन्नाटकञ्च नवाङ्कम्।

**५- नाट्यवर्जनाः**

प्रकृते मल्लिखिते नाटके प्राचीननाटकादिवन्नाट्यवर्जनाः परिपालिता वर्त्तन्ते। नाट्यवर्जनाश्च- भरतानुसारेण मलमूत्रत्यागः स्नानमैथुने वधः शीलहरणादयः। तदुक्तं तेन नाट्यशास्त्रे-



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यद्वा शयीतार्थवशादेकाकी सहितोऽपि वा।

**चुम्बनालिङ्गनञ्चैव तथा गुह्यञ्च यद् भवेत्॥**

**दन्तच्छेदं नखच्छेदं नीवीसंस्रनमेव च।**

**स्तनान्तरविमर्दञ्च रङ्गमध्ये न कारयेत्॥**

(नाट्यशास्त्रम् २१। २९६-२९७)

भरतो भोजनम्, तद्ग्रहणं वा जलक्रीडां अन्यानि लज्जाजनकानि कार्याणि च नाटके निषेधति। तदुक्तं तेन तत्रैव-

भोजनं सलिलक्रीडा तथा लज्जाकरञ्च यत्। एवंविधं भवेद्यद्यत् तत्तद्रङ्गे न कारयेत्॥ (नाट्यशास्त्रम् २१। २९८) इति

## ६- नाटकशरीरशृङ्गारः

प्राचीनसंस्कृतनाटकानां दर्शनेन अनेका विशेषतास्तत्र दृश्यन्ते। तदनुसारेण विशिष्टं नाटकशरीरं भवति। ताश्च विशेषताः प्रायेण इदानीमपि पालिता दृश्यन्ते। नाटकस्य प्रारम्भे मङ्गलश्लोको नान्दिपाठो वा भवति। तदनन्तरं प्रस्तावनायाः पर्यायः समागच्छति यत्र सूत्रधारो नाटकस्य प्रयोजनानि प्रस्तौति कथायाः सूत्रञ्च पातयति। नाटके राज्ञ्या राजा हे राजन्निति न सम्बोध्यते स्म किन्तु आर्यपुत्र इति सम्बोध्यते स्म। राजा च स्वपत्नीं हे राज्ञि इति न संबोधयति स्म किन्तु हे देवि इति। एतत्सर्वं प्रकृतनाटकेऽपि पालयितुं प्रयासो विहितो वर्त्तते। अधुना नाटकं हि शरीरदृष्ट्या त्रिविधं भवति-पद्यनाटकं गीतिनाटकं गद्यनाटकञ्च। संस्कृतनाटकन्तु गद्यपद्यपयं भवति स्म।

## ७- प्राचीनसंस्कृतनाटकानां स्थितिः

कालिदास इमान् पूर्ववर्तिनो नाटककारान् समुल्लिखति अभिज्ञानशाकुन्तले-भासं सोमिल्लं कविपुत्रञ्च। एवं भासः संस्कृतस्य प्रथमो नाटककारो भवति। भासस्यानेकानि सन्ति नाटकानि। तानि च प्रतिमानाटकम् दूतघटोत्कचः कर्णभारः उरुभङ्गम् प्रतिज्ञायौगन्धरायणः स्वप्नवासवदत्तादीनि। ईशवीयप्रथमशतके जातत्वेन स्वीकृतस्य कालिदासस्य च मालविकाग्निमित्रम्



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलम् च उपजीव्यानि नाटकानि सन्ति चोदाहरणीयानि। विशाखदत्तस्य मुद्राराक्षसम् शूद्रकस्य मृच्छकटिकम् हर्षवर्धनस्य प्रियदर्शिका रत्नावली नाटिका नागानन्दम् नाटकं च प्रसिद्धानि उपजीव्यत्वेन स्वीकृतानि सन्त्यस्माकं कृते। संस्कृतनाटकस्येतिहासचर्चायां सप्तमशतकस्य भट्टनारायणस्य प्रसिद्धस्य तन्नाटकस्य वेणीसंहारस्यापि नाम समुल्लेखनीयं भवतीदानीम्।

## ८- नेपाले सँस्कृतनाटकलेखनपरम्परा -

प्राचीनप्रामाणिकनाटकानामाधारेण नेपालेद्रपि संस्कृतनाटकानि लिखितानि। लिच्छविकाले उल्लेखनीया नाटकानां स्थितिर्न दृश्यते। तदा नेपाले पर्यटन् चीनदेशीयः पर्यटको लिखतीदमेव- तत्काले जनानां मनोरञ्जनाय काष्ठमण्डपोपत्यकायां नाटकान्यभिनीयन्ते स्मेति। ततः परं मल्लकाले तु नाटकानां दृढा स्थितिर्दृश्यते। जयस्थितिमल्लस्य राज्यकाले रामाङ्कनाटिका भैरवानन्दनाटकम् यक्षमल्लस्य समये पाण्डवविजयनाटकम् जगज्ज्योतिर्मल्लस्य समये वीरवाहुनाटकम् जगज्ज्योतिर्मल्लस्यैव रचनाभूतं हरगौरीविवाहनाटकम् कुञ्जविहारिनाटकम् जितामित्रमल्लस्य जैमिनिभारतम् अश्वमेधनाटकम् प्रतापमल्लस्य गीतदिगम्वरनाटकञ्च लिखितम्। तानि च नाटकानि राष्ट्रियाभिलेखालयं संशोभयन्ते। १४२७ तमविक्रमवर्षीयस्य धर्मगुप्तस्य रामाङ्कनाटिका तु प्रकाशिता वर्त्तते। भक्तपुरस्य रायमल्लस्य कार्यकाले शुभराजशूद्रनामा पाण्डवविजयं रूपमञ्जरीपरिणयनाटकञ्च लिखितवान्। राज्ञो भूपतीन्द्रमल्लस्य समये महाभारतनाटकं विद्याविलापनाटकञ्च लिखितं श्रूयते। जगज्जयमल्लस्य अभिनवचन्द्रोदयनामकं नाटकञ्च प्राप्यत इति मल्लकालः संस्कृतनाटकैः सम्पन्न इत्यावेदयितुं शक्यते।

शाहकाले च पृथ्वीनारायणस्य राजगुरुः शक्तिवल्लभो (१८४९ विक्रमवर्षे ) जयरत्नाकरनाटकं लिलेख। हास्यकदम्वनामकञ्चान्यन्नाटकं लिखितवान् सः। १९४९तमविक्रमवर्षे रामेछापाभिजनेन छविलालसूरिणा सुन्दरचरितम् कुशलवोदयञ्च नाटकं व्यलेखि। तदनन्तरञ्च चूडानाथभट्टरायविदुषा परिणामनामकं नाटकं (२००५विक्रमवर्षे) विलिख्य तदभिनयप्रयासोऽपि विहितः। अस्मिन्नेव क्रमे कृष्णप्रसादघिमिरेविदुषा २०२८विक्रमवर्षे पूर्णाहुतिरिति २०२५ वर्षे नेपालेश्वरगौरवनामकं २०४२ तमविक्रमवर्षे च महामोहनामकं नाटकं लिखितम्। एवमेव प्राध्यापकेन मधुरकथावाचकेन खेमराजकेशवशरणेन भक्तसुदामाचरितसनाथितं मित्रसङ्गमम् नाम नाटकं लिखितम्, तस्य मञ्चनाभ्यासश्च विहितः। एवमेव



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पाल्पाजनपदीयस्य हरिहरशर्मणः २०५९तमविक्रमसंवत्सरीयाणि लघुनाटकानि निरक्षरता, मुद्रामेधव्रतम् (दृश्यद्वयात्मकम्) पश्चात्तापः (एकदृश्या -त्मकम्) बद्धमुष्टिविलासम् (नाटकम्?) सन्तीति श्रूयते। एवमेव नारायणदत्तशास्त्रिणः २०१४ विक्रमवर्षे लिखितं नेपालमातृनामकं नाटकमस्तीति श्रूयते। प्राध्यापकस्य रामहरिदाहालविदुषः कर्मसिद्धि-शान्तिदूत-शान्तिसंविदादिलघुनाटकानि गुरुकुलचर्यम् सत्प्रभवम् आचारिकम् दृष्टिसृष्टिरित्यादीनि पूर्णाङ्कानि च नाटकानि निकटे भविष्यति प्रकाश्यमानानि सन्ति। मत्कृतं कृष्णागारोज्जीवनमिति च नाटकं प्रस्तुतं द्रुतमेव प्रकाशितं भविष्यति।

## ९- नाटकीयतत्त्वानामाधारेण प्रकृतनाटकसङ्घटनम्-

कथानक-नायक-संवाद-द्वन्द्वविधान-भाषाशैली-परिवेशोद्देश्या-ऽभिनेयताभिर्नाटकं सङ्घटितं सफलञ्च भवति। इमानि तत्त्वानि नाटकेऽत्र सन्तीति मन्ये। नाटकस्य कौतूहलजननी कथात्र वर्त्तते- भारतस्य दाक्षिणात्ये प्रदेशे कृष्णाया नद्यास्तटे विजयवाडानगरे कश्चन शमसारनामा राजा बभूव। तस्य च पत्नी गुणगणान्विता सौन्दर्यातिशयवती मन्दाकिनी नाम्नी बभूव। सा चैकचत्त्वारिंशद्वर्षदेशीयापि सन्तानवती नाभूत्। पुत्रजीविकाद्यौषधयः सेविताः, अन्ये चोपायाः समनुष्ठिताः परं साफल्यं नाधिगतम्। अतस्तदर्थं तौ दम्पती तपसे वनं गतवन्तौ। तच्च वनं कृष्णातटीयमासीत्। तत्रत्येन कठिनेन तपसा मन्दाकिन्यां गर्भः स्थितः। पूर्णे चावधौ मन्दामिनी पुत्रं जनयामास।

कृष्णायास्तटे जातत्वेन तस्य नाम कृष्णागार इति कृतम्। स च पूर्णेन्दुरिव शीघ्रमवर्धत। तस्य जन्मनश्चतुर्दशवर्षे माता मन्दाकिनी असाध्येन रोगेण कालकवलीकृता। शमसारस्य कृष्णागारस्य च दुर्दिनानि प्रारब्धानि। वर्षद्वयानन्तरं सर्वानुमत्या आवश्यकतया च तेन राज्ञा विवाहान्तरं कृतम्। चित्रकूटस्य भुजकवचनाम्नो राज्ञो भुजावतीनाम्नी राजकुमारी तेन विवाहिता। विवाहानन्तरञ्च कृष्णागास्य निवासादिकं राजप्रासादस्य परिसरेऽपि दूरस्थे भवने समजायत। राज्ञः शमसारस्यान्येषां व्यवहारेण च भुजावतीकृष्णागारौ अपरिचितावभूताम्। कृष्णागारस्य तद्विषयिणि ज्ञानेऽपि भुजावती कृष्णागारे अज्ञातैवासीत्। तत्त्वं व्यावहारिकेण कारणेनापि भवेत्।

भुजवत्याः प्रेम्णा प्रकृतायितो राजा कतिपयदिनानामनन्तरं मृगयायै गतवान्। ज्ञातस्वादा भुजावती इतस्ततो भ्रमन्तं कृष्णगारमनेकवारं दृष्टवती। वयसा तुल्यौ तौ आस्ताम्। एकदा सा तं दासीद्वारा आकारितवती स्वप्रकोष्ठम्। तत्रागत्य कृष्णागारः तत्र स्थिते आसने नम्रीभूयावसत्। राज्ञी



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वसमीपमागन्तुमादिदेश। स किञ्चित् समीपस्थोऽभूत्। तेन सामीप्येनापि सा न सन्तुष्टा तमतिसन्निधातुमादिष्टवती आलिङ्घितुं चेष्टमाना अजायतेति कृष्णागारो दूरमपससार। तत्र तेन उक्तञ्च तवाहं पितृसम्बन्धेन पुत्र इति तवाभीष्टं पूरयितुमक्षम इति। तदुक्त्या कृष्णागारक्रियया च स्वाभीष्टेद्रफला पराजयमनुभवन्ती ज्ञातसम्बन्धा च स्वदुर्गुणान् गोपयितुं तं दण्डयितुञ्च कोपभवनं गतवती। तत्र रोदनमभिनयन्ती हस्तौ पादौ च प्रस्फाल्य वस्त्राणि निरस्य च दुश्चेष्टयामास। तत्रैव समये राजा शमसारो मृगयातः समागत्य तस्या दुरवस्थां दृष्टवान्। देवातिप्रियःतपःप्रसूनश्च कृष्णागारो मम सतीत्वलुण्ठने बहुबारमचेष्टतेत्यादिकमारोपयामास च।

विवेकहीनो भूत्वा राजा पुत्रपक्षमपृष्ट्वैव तस्य तपःप्रसूनस्य कृष्णागारस्य हस्तौ पादौ च छित्त्वा चतुष्पथे हातुमादिदेश,नागरिकानां तत्सहयोगञ्च दाढर्च्येन निषिद्धवाँश्च। ततोऽसहायमतिपीडितञ्च दृष्ट्वा गुरुगोरखः स्वगुरुणा मत्स्येन्द्रनाथेन सह उपस्थितवान्। तमुपचर्य च साङ्गं विधाय राजप्रासादं गन्तुं निर्दिष्टवान्। परं स कृष्णागारो म्रियेऽहं परं घातकं राजप्रासादं नैव गच्छामीति उक्त्वा गुरुद्वयमनुजगाम। तत्र च गुरुद्वयस्याज्ञया द्वादशवर्षाणि तपस्यां विधाय तत्र साफल्यञ्चावाप्य योगं प्रचार्य गोरखमतं विस्तार्य नवनाथेषु चौरङ्गिनाथो बभूव। इदं संक्षिप्तं कथानकं कथावस्तु वा। अत्र भुजावती कृष्णागारयोर्द्वन्द्वः शमसारकृष्णागारयोश्चानुभवनीयः। अत्र कृष्णागारोज्जीवने नाटके कृष्णागारो नायकः। अत्र पात्राण्यनेकानि, तेषां प्रश्नोत्तराणि संवादः। स च क्वचन स्वगतः क्वचन च परगतः प्रभावकारी एवानुभूयते। द्वन्द्वविधानन्तूक्तमेव। भाषा शैली चाकर्षिका व्यावहारिकी च नाटकपठनेऽनुभविष्यत एव।

परिवेशो नाम वातावरणम्। तच्च राजप्रासादे राजकीयमैश्वर्यमयं तपोवने शान्तिमयं चतुष्पथे च बीभत्सम्। प्रकृतस्यास्य नाटकस्योद्देश्यमस्ति दुर्भावानां समाप्तिः सद्भावानां विकासनञ्च। शमसारस्य पत्न्यैकपक्षपातित्वस्य निन्दा कृष्णागारे सहानुभूतिश्च। केनापि पित्रा शमसारवन्न वर्त्तितव्यम् केनापि पुत्रेण च कृष्णागारवद्विपत्तौ न पतितव्यमित्युपदेशप्रदानञ्चास्ति। घण्टात्रयात्मिका अभिनेयता अत्रास्ति। ततः स्वल्पसमयस्य कृते तु नाटकस्य विशेषानंशानादायाभिनेयता सम्पादनीया भवति। चौरङ्गिणो नवनाथेषु अन्तर्भावात् सुखान्तत्वमस्य नाटकस्य। स्थलविशेषेऽन्येषां रसानां सत्त्वेऽपि प्रमुखत्वं व्यापकत्वञ्च शान्तरसस्य दृश्यते। नवाङ्का अत्र विलसन्ति। प्राचीननाटकवदत्र प्रस्तावनाश्लोकतो नाटकं प्रारभते -



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नित्यं प्रणौमि गुरुगोरखसिद्धराजं
श्रीशङ्करात् प्रसृतयोगविधेस्तु विज्ञम् ।
योगस्य सिद्धिविभवेन हि छिन्नगात्रः
कृष्णो बभूव सकलश्च हि यत्कृपातः ॥ इति

नाटकान्ते राष्ट्रियशुभा कामना चार्पिता या खलु कालीदासीयादिनाटकेषु दृश्यते -

प्रवर्त्ततां राष्ट्रियगौरवोन्नतिः, सुमोदतां वैदिकधर्मसन्ततिः ।

महीयतां प्रोन्नतसंस्कृतस्थितिर्विवर्धतां गोरखवर्त्मवल्लरी ॥ इति ।

विराजतां नाटकमिदं विद्वज्जनमनांसि ।

हरिः ॐ तत्सत् ।
प्रा. डा. विष्णुप्रसादः देवकोटा
कलङ्कीस्थानम्-१४
वैशाखपूर्णिमा २०८२ ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# कृष्णागारोज्जीवनम् नाटकको अनुशीलन

प्रा.डा. नवराज कट्टेल

## १.विषयप्रवेश

कृष्णागारोज्जीवनम् संस्कृत भाषामा निबद्ध नाटक प्रा.डा. विष्णुप्रसाद देवकोटाले लेख्नुभएको हो। उहाँ साहित्यको विद्यार्थी नभएर व्याकरणशास्त्रका आधिकारिक विद्वान् हुनुहुन्छ। तर पनि उहाँले नेपालगौरवम् महाकाव्य र ३ वटा एकाङ्की एवं प्रस्तुत पूर्णाङ्की नाटकसमेत लेख्नुभएको छ। यी ग्रन्थ लेख्नुको पछाडि जयतु संस्कृतम् कारण रहेको छ। जयतु संस्कृतम् ले हरेक वर्ष संस्कृत कविगोष्ठी गर्दैआएको छ र २०८२ सालमा २९ सौँ संस्कृत कविसम्मेलन भएको छ। वाध्यतावश यस गोष्ठीमा भाग लिन कलम चलाउँदा पनि नेपालका संस्कृत-सेवकर विद्यार्थीहरूलाई संस्कृतमा काव्यकृति रचना गर्न प्रेरणा मिलेको छ र पूर्वअभ्यास पनि भएको छ।

प्रस्तुत सन्दर्भमा यही प्रेरणा र अभ्यासका कारणले प्रा. विष्णुप्रसाद देवकोटाले नेपालगौरवं महाकाव्य रचना गर्नुभएको हो र जुन कृति जयतु संस्कृतम् संस्थाबाट नै प्रकाशित भैसकेको छ भने प्रा. रामहरि दाहालको अवधेशचरितम् महाकाव्य प्रकाशनको प्रतीक्षामा रहेको छ। मेरा आदरणीय गुरु नेपाली विषयका प्राध्यापक दुर्गाप्रसाद दाहालज्यूले नेपालीमा भन्दा संस्कृतमा बढ्ता कलम चलाउन थाल्नुभएको छ। संख्या र स्तरका दृष्टिले हेर्दा उहाँ संस्कृत कविका रूपमा स्थापित भैसक्नुभएको छ। मेरा शिष्य र सहकर्मी प्रा.डा. मुकुन्दप्रसाद लामिछानेले दर्जनौँ कविताहरूको रचना गरेको पाइन्छ र कवितामा कवित्व नै प्रकट भएको अनुभूत हुन्छ। प्रा. टीकाराम अधिकारी, प्रा. राधाकृष्ण अधिकारी, प्रा. ऋषिराम पोखरेल, प्रा. शिवहरि मरहट्टा, प्रा. जीवन अधिकारी आदि दर्जनौँ प्रतिभाहरूले पनि संस्कृत काव्य कृतिमा कलम तिखार्ने अवसर पाएको देखिन्छ। नेपाली भाषासाहित्य कार्यक्षेत्र भएका प्रस्तुत पङ्क्तिकारले पनि विद्वान्हरूको संगति र आशीर्वाद पाएर कर्मफलम् (२१ लघुनाटक संग्रह) र दुई खण्डकाव्य, एवं संस्कृत कविता लेख्ने र कलम



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिखार्ने अवसर पाएको हो। संस्कृतमा लघुनाटक, नाटक लेख्ने लेखाउने र रङ्गमञ्चको अभियान चलाउने कार्य पनि जयतु संस्कृतम् संस्थाले स्थापना कालदेखि नै गर्दै आएको छ। प्रस्तुत नाटक पनि त्यही शृङ्खलाको एउटा कडीका रूपमा प्रकट भएको दृष्टिगोचर हुन्छ।

## २. नेपालमा संस्कृत नाटक लेखनको परम्परा

### (क) लिच्छविकालका संस्कृत नाटक

लिच्छविकालमा नाटक लेखिए वा लेखिएनन् स्पष्ट छैन र यस कालखण्डका नाटकहरू उपलब्ध छैनन्। तर चिनियायात्रीले उपत्यकामा मनोरञ्जनका लागि नाटक खेलिने कुरा संकेत गरेका छन्। तर ती नाटक कस्ता थिए, के थिए भनेर कुनै सूचना पाउन सकिएको छैन। तर मल्ल र शाहकालका नाटकहरू भने उपलब्ध छन्।

### (ख) मल्लकालमा लेखिएका संस्कृत नाटकहरू

संस्कृतभाषा साहित्य र नाटकका दृष्टिले मल्लकाल उर्वरहेको पाइन्छ। मल्लकालका हजारौंग्रन्थहरू आज पनि राष्ट्रिय अभिलेखालयमा रहेका छन्। तिनमा संस्कृतका नाटकहरू पनि उल्लेखनीय छन्। मल्लकालमा जे जति नाटक लेखियो प्रेक्षागृहमा प्रदर्शित गरियो तर ती सबै नाटक आज पाउन सकिदैन भन्ने धारणा अनुसन्धाताहरूको रहेको देखिन्छ। तैपनि केही नाटकहरू उपलब्ध छन्। लिच्छविकालमा पनि मनोरञ्जनका लागि नाटक खेलाइन्थ्यो भन्ने कुरा त्यस वेलाका चिनीया यात्रीले उल्लेख गरेको पाइए पनि नाटकका विषयमा कुनै सुइँको पाउन सकिदैन।

विभिन्न मल्ल राजाहरूको समयमा अनेक (३३ वटा) नाटक लेखिएका र कतिपय नाटक खेलिएका छन्, तिनको संक्षिप्त विवरण निम्नानुसार रहेको छ :

राजा जयस्थिति मल्लका समयमा **रामाङ्कनाटिका, भैरवानन्द नाटक** लेखिएका छन्। यक्षमल्लका समयमा **नरपतिजयचर्याटीका** र **पाण्डवविजय (नाटक)**,



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तयार भएका हुन्। जयज्योतिको समयमा **वीरबाहुनाटक**, आएको पाइन्छ भने जगज्योतिर्मल्लकै रचना **हरगौरीविवाहनाटक, कुञ्जविहारीनाटक, कुवलयाश्वनाटक, कीचकवधनृत्यनाटक,** पाइएका छन्। जितामित्र मल्लको **जैमिनिभारत, अश्वमेधनाटक,** प्रताप मल्लका **गीतदिगम्बरनाटक** पनि उपलब्ध रहेका छन्। धर्मगुप्त (विसं. १४२७) ले **रामाङ्कनाटिका** लेखेको पाइन्छ भने अर्का माणिक (१४३४) ले **राघवानन्द र भैरवानन्द नाटक** लेखेका थिए।

यक्षमल्ल १४८५-१४५२) ले **स्रग्धरास्तोत्रम्** लेखेका थिए। यिनकै समयमा गयपतिले **चतुरङ्गमहाभारतनाटक** को रचना गरेका थिए।भक्तपुरे रायमल्लका समयमा शुभराज शूद्र (१५३८-१५५३)ले **पाण्डवविजयनाटक र रूपमञ्जरीपरिणयनाटक** लेखेका थिए। राजा भूपतीन्द्र मल्ल (१७५३-१७७९)का **महाभारतनाटक, विद्याविलापनाटक** प्रसिद्ध छन् ।**माधवानलनाटक, रुक्मिणीपरिणयनाटक, ऊषाहरणनाटक** पनि यिनकै हुन् भन्ने आशंका छ।

जगज्जय मल्ल (१७७९-१७९१)को **अभिनवचन्द्रोदयनाटको** उल्लेख पाइन्छ भने राजा रणजित् मल्ल (१७७९-१८२६)का **गणितमञ्जरी र सङ्गीतचूडामणि**को उल्लेख भेटिन्छ। यिनका नाटकमा **ऊषाहरणनाटक, अन्धकासुरवधोपाख्याननाटक, कृष्णचरित्रनाटक, मदनचरित्रनाटक, लोका (कोलान?) सुरवधोपाख्याननाटक, त्रिचत्वारिंशदङ्कं रामायणनाटकम्** गरी ६ नाटकका नाम उपलब्ध छन्। रणजित्कै नाममा **इन्द्रविजयनाटक, कृष्णकैलाशयात्रोपाख्याननाटक, खट्टवासुरवधोपाख्याननाटक, चन्द्राङ्गोपाख्याननाटक, मान्धात्रुपाख्याननाटक** पनि छन्।

### (घ) शाहकालीन संस्कृत नाटकहरू

गोरखाका पण्डित राजगुरु शक्तिवल्लभ अर्याल (१७८१-१८६३ वै.?) १८४९ मा **जयरत्नाकरनाटक र हास्यकदम्बनाटक** (नेपाली अनुवादसहित) लेखेका थिए। रामेछाप जिल्ला निवासी छविलाल सूरि ढुङ्गयाल (१८९६-१९६३ वै.) १९४९ मा ७ अंके **सुन्दरचरितम्** र ८ अंके **कुशलवोदयम्** नाटक लेखेका छन्। चूडानाथ भट्टराईले (१९७८-०५२) लामो समयसम्म वाल्मीकिविद्यापीठमा पढाएका थिए भने ने.रा.प्र.प्र.मा सदस्यसमेत रहेका भट्टराईले नेपालीमा पनि थुप्रै पुस्तक



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेखेका छन्। उनको संस्कृतमा **परिणामम्** नाटक २००५ सालमा प्रकाशित भएको पाइन्छ।

प्रजातन्त्रोत्तरकालमा नारायणदत्त शास्त्रीले २०१४ सालमा **नेपालमाता** नामक नाटक रचना गरेका थिए। संस्कृतका महाकवि कृष्णप्रसाद घिमिरेका नाटक वि.सं. २०२८ मा प्रकाशित भएका छन्। तिनमा **पूर्णाहुति** नाटक महाभारतको कथामा आधारित छ। यिनैको अर्को नाटक २०३५ मा रचित **नेपालेश्वरगौरम्** भन्ने छ। **नेपालेश्वरगौरवं** नाटक विसं २०३५ मा नेपाल र जर्मनीदेशका विद्वान्हरूको विद्वद्गोष्ठी काठमाडौंमा आयोजना गरिएको थियो। त्यही सभामा समुपस्थित विद्वानुहरूलाई देखाउन यो नाटकको रचना गरिएको थियो। यसमा २२ दृश्य रहेका छन् र यसमा नेपालका विभिन्न व्यक्तित्वहरूको चरित्र प्रस्तुत गरिएको छ। २०४२ सालमा यो नाटक प्रकाशित भयो। घिमिरेकै अर्को **महामोहः** नामक नाटक पनि रहेको छ। खेमराज केशवशरणको भक्त सुदामाको चरित्रमा आधारित '**मित्रसङ्गमः**'(२०३३) नाटक रचना भएको पाइन्छ।

काठमाडौँ निवासी तोयनाथ पाण्डेयले **तमसो ज्योतिषि** र **मातृहत्याया आधारम्** दुई वटा लघुनाटकको रचना गर्नुभएको पाइन्छ भने यिनको मञ्चन पनि भएको पाइन्छ।

पाल्पा जनपदका हरिहरशर्मा अर्यालका चार रूपकहरू विसं २०५९ सालमा प्रकाशित भएका छन्। ती **रूपकहरूमा १. निरक्षरता (दृश्यद्वयि) २. मुद्रामेधव्रतम् (दृश्यद्वयि) ३. पश्चात्तापः (एकदृश्यम्) ४. बद्धमुष्टिविलासम् (पञ्चदृश्यम्)** रहेका छन्। प्राडा. नवराज कट्टेलले जयतु संस्कृतम् कै आह्वान र संस्कृत लोकभाषा अभियानकै अङ्गका रूपमा लेखेका २१ वटा लघुनाटक प्रा.डा. विष्णुप्रसाद देवकोटा, प्रा. रामहरि दाहाल र प्रा.डा. व्रतराज आचार्यको भूमिका र शुभकामनासहित (२०८१।भाद्र) मा **कर्मफलम्** प्रकाशित भएको छ। कट्टेलको अर्को ११ वटा लघुनाटकको सङ्ग्रह पनि प्रकाशनको प्रतीक्षामा रहेका छ।

नारायणदत्त शास्त्रीले २०१४ सालमा **नेपालमाता** नामक नाटक रचना गरेका छन्। यो नाटक २०५८ सालमा जयतु संस्कृतम् पत्रिकामा प्रकाशित छ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् को अनुरोधमा प्रा. रामहरि दाहालज्यूले **आचारिकम्, गुरुकुलचर्यम्, सत्प्रभवम्, दृष्टिसृष्टिः** जस्ता चार वटा पूर्णाङ्की नाटक र ४ वटा एकाङ्की नाटक लेख्नुभएको छ। प्रा.डा. विष्णुप्रसाद देवकोटाज्यूले पनि ३ वटा एकाङ्की र एक पूर्णाङ्की नाटकको रचना गर्नुभएको छ।

### ३.नेपालमा संस्कृत रङ्गमञ्चको प्रारम्भ र परम्परा

नेपाल आदिकालदेखि नै शिव र पार्वतीको क्रीडाभूमि हो। शिव स्वयं नाटराज हुन्। त्यसैले गर्दा यहाँ गीत, सङ्गीत, नाटक आदिको प्रयोग भयो होला भनेर अनुमान गर्न सकिन्छ। नाट्यप्रदर्शनमा लिच्छवि, मल्ल र शाहकालमा अनेक प्रयत्न भएको कुरा ऐतिहासिक तथ्यबाट बुझ्न सकिन्छ।

**(क) लिच्छविकाल-** लिच्छविकाल (ईशाको १ देखि १२ औँ शताब्दीसम्म) मा के कस्ता नाटकहरूको अभिनय भयो भन्न सकिदैन। तर पनि छैटौँ शताब्दीमा नेपाल आएका चिनियाँ पर्यटक ह्वेन्त्साङ्गले उनको भ्रमण वृत्तान्तमा नेपालमा मनोरञ्जनका लागि गीत, नृत्य र नाटकको आयोजना हुने कुरा उल्लेख गरेका छन्। तर ती नाटकको विवरण भने कतै पनि पाउन सकिएको छैन। ती नाटक कस्ता थिए, कसले लेखेका थिए, कसरी मञ्चन हुन्थ्यो भन्न सकिदैन। ८ औँ शताब्दीपूर्व लिच्छविकालका लिखित पुस्तकहरू पनि पाउन सकिदैन। त्यस समयमा संस्कृत लेखिएका २०० जति शिलालेख र धातु अभिलेखहरू भने उपलब्ध रहेका छन्। लिच्छविकालमा संस्कृत नै राजभाषा रहेको थियो।

**(ख) मल्लकालः-** मल्लकाल संस्कृत नाटक लेखन र मञ्चनका दृष्टिले निकै उर्वर रहेको देखिन्छ। मल्लकालमा लेखिएका ३२ वटा नाटकहरूको विवरण र नाटकहरू पनि राष्ट्रिय अभिलेखालयमा पाउन सकिन्छ भने कतिपय नाटकहरू प्रकाशित पनि भएका छन्। जगज्ज्योति मल्ल -विसं. १६८५) मा **हरगौरीविवाह नाटक, कुञ्जविहारी नाटक, कुवलयास्व नाटक** लेखेका थिए र आफ्नै तुलादान समारोहमा ती नाटकहरू प्रदर्शन पनि गरिएको थियो।अन्य नाटकहरू पनि प्रदर्शित भएका थिए भन्ने सूचना पाइन्छ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जगत्प्रकाशमल्लले वसन्तपुरराजप्रासादमा एक रङ्गशालाको निर्माण गराएका थिए भन्ने पनि ऐतिह्यहरूको विचार पाइन्छ। जितामित्रमल्लले **अश्वमेधनाटक** लेखेको र प्रदर्शित गरेको जानकारी पाइन्छ। प्रतापमल्लले पशुपतिनाथ मन्दिरमा तीन महिनासम्म बसेर प्रायश्चित्त र केही अनुष्ठानसमेत गरेका थिए, मन्दिर बनाएका थिए भने तुलादान पनि गरेका थिए। त्यस अवसरमा वंशमणिविरचित **गीतिदिगम्बर नाटक** प्रदर्शित गरिएको थियो भन्ने विज्ञहरूको अभिमत रहेको पाइन्छ। प्रतापमल्ल स्वयं कवि थिए। उनको रचना शिलापत्रमा पाइन्छन्।

**(ग) शाहकालः**- शाहकालमा प्रजातन्त्रपूर्व संस्कृत नाटक मञ्चन भयो होला तर त्यसको कुनै विवरण पाउन सकिएको छैन। विसं १८०१ देखि १८७१ सम्म नेपाल एकीकरणमा नै समय गएको देखिन्छ। सुगौली सन्धिपछि १८७१ पछि १९०३ सम्म युद्धअन्तरालको समय रह्यो र आन्तरिक कलहमा समय गयो। वि. सं. १९०३ मा जङ्गबहादुर राणाले राज्यको बाग्डोर आफ्नो हातमा लिए। उनले पनि स्वदेश र विदेशका अनेक अप्ठ्याराहरूलाई मिलाउँदैमा र भाइभारदारलाई मिलाउँदैमा समय बिताए। वीर समसेर सत्तामा आएपछि मनोरञ्जन, रङ्गशैसको समय सुरु भएको देखिन्छ। वीरसमसेरकै दरबारमा प्रदर्शन गर्न अभिज्ञान शाकुन्तल र प्रियदर्शिकाको नेपालीमा मोतीराम भट्टले अनुवाद गरेका थिए भन्ने पनि पाइन्छ। राणकालमा भने अनेक राणादरबारमा नै प्रेक्षागृह बनाइएको पाइन्छ र त्यहाँ नाटक मञ्चन हुने गरेको सूचना पनि भेटिन्छ। राणाकालमा सुरुमा उर्दूका नाटक हुन्थे भने पछि नेपाली नाटकको पनि प्रदर्शन हुन थालेको बुझिन्छ। राणाकालमा संस्कृत नाटक प्रदर्शन भएनभएको विषय त्यति स्पष्ट छैन।

**(घ) प्रजातान्त्रिक शाहकाल** : यो कालखण्ड २००७ सालदेखि २०६४ सालसम्म व्याप्त रह्यो। २००४ सालको जयतु संस्कृतम् आन्दोलदेखि नै संस्कृतका विद्यार्थीहरूले यदाकदा संस्कृत नाटक मञ्चन गर्ने गरेको भन्ने त सुनिन्छ तर त्यसको कुनै ठोस प्रमाण भने भेटिएको छैन। २००९ सालमा काठमाडौँमा राजकीय संस्कृत महाविद्यालय स्थापना हुँदा पनि नाटक र सांस्कृतिक कार्यक्रम भएको भन्ने सुनिन्छ तर त्यसको ठोस आधार भने पाउन सकिएको छैन।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जब चूडानाथ भट्टराई, तोयनाथ पाण्डेय, विद्यानाथ उपाध्याय, ऋषिराम पोखेल नाटकक्षेत्रमा आए । त्यसपछि संस्कृत नाटक प्रदर्शनमा गति आउन थाल्यो । संस्कृत नाटक समितिको चर्चा हुन थाल्यो र २०१४ सालमा त यस्तो समिति बन्यो पनि । अनि नेपालमा संस्कृत नाटक प्रदर्शन प्रारम्भ भयो । त्यो नाटक समितिमा चूडानाथ भट्टराइ सभापति थिए भने विद्यानथ उपाध्याय सचिव पदमा रहेका थिए । यस संस्कृत नाटक समितिले एक दशकमा अनेक नाटकको प्रदर्शनसमेत गऱ्यो ।

२०१४ सालमा भारतका राष्ट्रपति राजेन्द्रप्रसाद नेपाल आएका थिए । त्यस अवसरमा मुद्राराक्षस भन्ने संस्कृत नाटक प्रदर्शन गरिएको थियो । चूडानाथ र तोयनाथको नेतृत्वमा यो नाटकको मञ्चन गरिएको थियो ।

त्यस्तै नेपाल राजकीय प्रज्ञाप्रष्ठिानको वार्षिकदिवसको अवसरमा पनि (२०१५) **स्वप्नवासवदत्तं** नाटक प्रदर्श गरिएको थियो । त्यस्तै चतुर्थ बौद्धविश्वसम्मेलनमा **नागानन्द** नाटक प्रदर्शन गरिएको थियो । त्यस नाटकमा तोयनाथ नायक बनेका थिए भने गरुडको भूमिकामा विद्यानाथ रहेका थिए, त्रिचन्द्र कलेजका प्राध्यापक आशुतोष गांगुलीकी पुत्री नायिकाको भूमिकामा रहनुभएको थियो । नायक तोयनाथ र नायिकाको भूमिकामा रहेकी गांगुलीलाई राजा महेन्द्रले विशेष पुरस्कार पनि दिएका थिए (विद्यानाथ उपाध्यायबाट प्राप्त सूचना) ।

त्यस बेला भारतीय राजदूत हरीश्वरकी श्रीमतीकी आमा संस्कृतको विदुषी थिइन् । तिनको नाम क्षमाराव थियो । तिनी संस्कृतको नाटक पनि लेख्ने गर्दथिन् ।

त्यसैले गर्दा भारतीय दूतावासमा संस्कृतका र अन्य नाटक पनि प्रदर्शित हुन्थे । कुनै बेला नाटक हेर्न राजा महेन्द्रलाई पनि बोलाइएको थियो र केही संस्कृतका विद्वान्हरूलाई पनि निम्ता थियो । राजा महेन्द्र चलाख थिए र राष्ट्रवादी पनि थिए, कुनै पनि गौरवको काम नेपालले गर्नुपर्छ, कोहीसंग पनि नेपाल हेपिनुहुँदैन भन्ने मान्यता राख्थे । भारतीयहरूले संस्कृत नाटक प्रदर्शन गर्न सकेकामा निकै घमण्ड व्यक्त भएको बुझे । सोही ठाउँमा नै राजा महेन्द्रले चूडानाथलाई डाकेर मन्दस्वरमा हामीले पनि संस्कृत नाटक देखाउन सक्तैनौं ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सकिन्छ भने प्रयत्न गर्नुहोस न। चतुर चूडानाथले पनि तुरुन्तै साधनस्रोत जुटेमा सकिन्छ किन नसक्नु भनी जवाफ दिए। राजाले तत्कालै मन्त्रालयका चन्द्रमानलाई डाकेर संस्कृत नाटकका लागि साधनस्रोत जाटाइदिन निर्देशन दिए। साधनस्रोत जुट्यो, तालिम चल्यो, नाटकका पात्रहरू छानिए, संवाद घोकियो। त्यसमा विश्वप्रसिद्ध कालिदासको अभिज्ञान शाकुन्तल नाटक प्रस्तुत गरिएको थियो। नाटक भव्यतापूर्वक मञ्चन भयो। त्यो नाटक सिंहदरबारको प्रेक्षालयमा प्रदर्शन गरिएको थियो। सो नाटक प्रदर्शनमा भारतीय दूतावासका अधिकारीहरूलाई पनि आमन्त्रण गरिएको थियो।

अभिज्ञानशाकुन्तलमा विद्यानाथले सारथिको दुर्वासा ऋषको र कश्यपको भूमिका निर्वाह गरेका थिए तोयनाथ, ऋषिराम आदिले पनि नाटकमा भाग लिएका थिए (विद्यानाथ उपाध्यायबाट प्राप्त सूचना)।

त्यसपछि सिंहदरबारकै प्रेक्षागृहमा **मृच्छकटिक** नाटक पनि मञ्चित भयो। त्यस्तै सोही रङ्गमञ्चमा त्रिभुवनविश्वविद्यालयको वार्षिक दिवसको अवसरमा (२०१८-१९) **मालतीमाधव** भन्ने कालिदासको नाटकको अभिनय गरिएको थियो र यसका निर्देशक विद्यानाथ उपाध्याय रहेका थिए। विजयनाथ नायक र ऋषिराम पोखेल (प्राध्यापक) कपालकुण्डलाको भूमिकायमा रहेका थिए। यसै क्रममा गोरखाका होमनाथ ढकाल लगायतका छात्रहरूले सिंहदरबारमा भीमनिधि तिवारीको **सहनशीला सुशीला** नाटक खेलेका थिए। यसै कालखण्डमा संस्कृत छात्रसंघले '**भगवदज्जुकम्**' नाटक प्रस्तुत गरेको थियो॥ बेला बेलामा विश्वज्योति चलचित्रं मन्दिरमा पनि नाटकको मञ्चन हुनेगरेको थियो। संस्कृतका विद्यापीठहरूमा र संस्कृत विद्यालयहरूमा पनि संस्कृतका छोटा नाटक वा छोट्याएर नाटक प्रदर्शन गरिन्थे त्यसको पूरा विवरण त पाउन सकिदैन तैपनि सामान्य सूचना भने मिल्दछ। विद्यानाथ उपाध्यायले अनेक स्थानमा नवरसको भावाभिनय देखाउने गरेको जानकारी पनि पायन्छ। (विद्यानाथत उपाध्यायबाट प्राप्ता सूचना)।

साहित्यदर्पणमा रसको व्याख्याक्रममा प्रस्तुत पद्य र गद्यखण्डको संकलन गरेर नवरसको संयोजन गरिएको थियो। नवरसको प्रस्तुतिबाट राजा महेन्द्र पनि अत्यन्ते खुसी भएका थिए। त्यसैले संस्कृतको नाटक प्रदर्शनमा हौसला दिन्थे।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राजा महेन्द्रले संस्कृतको राम्रै अध्ययन गरेका थिए। २०१३ सालदेखि २०१७ सालसम्म संस्कृतका छात्रहरू सक्रिय थिए, अनेक कार्यमा भाग लिन्थे। अन्तर्राष्ट्रिय गोष्ठीहरूमा पनि प्रतिनिधित्व गर्थे। एक पटक बनारसमा छात्रजीवनमा नै विद्यानाथले **भगवदज्जुकम्** नाटकको अभिनयमा शाण्डिल्यको भूमिका निर्वाह गरेका थिए।भारतमा नै उनले **अभिज्ञानशाकुन्तल** को अभिनयमा भाग लिएका थिए र पुरस्कारसमेत पाएका थिजए। (विद्यानाथ उपाध्यायबाट प्राप्त सूचना)।

यसै कालखण्डमा **'नेपाली आमाको ऋण'** भन्ने नाटक तोयनाथ र श्यामदास वैष्णवको नेतृत्व र निर्देशनमा अभिनीत भएको थियो। त्यसमा केशवदीपकले पनि भाग लिएका थिए। संस्कृतको अर्को नाटक **'तमसो ज्योतिंषि'** तोयनाथले लेखेका थिए र पछि जयतु संस्कृतम् पत्रिकामा प्रकाशित भयो। यो नाटक डिल्लीबजारको सांस्कृतिकभवनमा अभिनीत भएको थियो (विद्यानाथत उपाध्यायबाट प्राप्त सूचना)।

यसै कालखण्डमा तोयनाथ पाण्डेको निर्देशनमा लेखनाथ पौडेलल लेखेको **'लक्ष्मीपूजा'** नेपाली नाटक सिंहप्रासाद प्रेक्षागृहमा प्रदर्शित गरिएको थियो। त्यसमा पनि संस्कृतका छात्रहरूको अभिनयमा सक्रियता रहेको थियो। यसै कालखण्डमा संस्कृतछात्रावासमा बृहद् आरण्यकोपनिषदको **जनकसभा** नाममा लेखिएको नाटक पनि अभिनीत भयो। यसको संवादरचना चूडानाथभट्टरायले लेखेका थिए। त्यस नाटकको याज्ञवल्क्यको भूमिकामा विद्यानाथ उपाध्याय थिए। सम्भवतः तीनधारा संस्कृत छात्रावासको २०२५ मा पुनर्निमाण गरेर यहाँको सभाकक्षमा त्यो नाटकको योजना गरिएको थियो। चूडानाथ भट्टराय नेपाल राजकीय प्रज्ञाप्रतिष्ठानको उपकुलपति हुँदा प्रज्ञाको नवीन र भव्य प्रेक्षागृहमा **कुमारसम्भव काव्यको भावाभिनय** प्रस्तुत गरिएको थियो।

वाल्मीकि विद्यापीठको वार्षिक जन्मजयन्तीका अवसरमा ०४०-४१ मा **रत्नाकरभावाभिनयम्** प्रस्तुत गरिएको थियो। यस पङ्क्तिकारले रत्नाकरको भूमिका निर्वाह गरेको थियो। यसैताका संस्कृत छात्रावासमा यस पङ्क्तिकारले तयार गरेको **कालचक्र** लघुनाटकको अभिनय गरिएको थियो। संस्कृत विश्वविद्यालयको स्थापना २०४३ मंसिर २५ गते भएको थियो। त्यसपछि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटक प्रदर्शनमा केही गति आएको थियो। राजा श्री ५ वीरेन्द्र सरकारको उपस्थितिमा सुर्खेत विकासक्षेत्रमा पनि **मेघदूतको भावाभिनय** प्रस्तुत गरिएको थियो। त्यस्तै **राजा** वीरेन्द्रको समुपथिमा ०४४।०४५ सालमा **भगवदज्जुकम्** नाटक प्रदर्शन गरिएको थियो। यसमा पनि नेसंविका तत्कालीन शिक्षाध्यक्ष विद्यानाथ उपाध्यायको निर्देशन रहेको थियो।

सनातन धर्मसेवा समितिबाट **सुदामा** (२०३२), **पार्थसारथिः** (२०३३) वेदविद्याश्रममा प्रदर्शन गरिएको थियो। सो पार्थसारथिः नाटकमा कवि रामहरि दाहाल(भीमसेन), कवि कृष्णप्रसाद भट्टराई (कृष्ण) र प्रयागराज भट्टराई (अर्जुन) भएर खेलेका थिए। दैवज्ञराज न्यौपाने निर्देशक थिए (कृष्णप्रसाद भट्टराईबाट प्राप्त जानकारी)।

यसै कालखण्डमा २०४५ सालमा महेन्द्र संस्कृत विश्वविद्यालयको समुद्घाटनका अवसरमा श्री ५ वीरेन्द्र सरकारकै समुपस्थितिमा **भगवदज्जुकम्** नाटक देखाइएको थियो। त्यस्तै राष्ट्रिय सभागृहमा नेपाल भारत विद्वत् गोष्ठीका अवसरमा २०५१ सालमा **मेघदूत भावाभिनय** प्रस्तुत गरिएको थियो भने **कुमारसम्भव-भावाभिनय** (२०५१ वैक्रमाब्द) पनि प्रस्तुत भएको थियो। यस्तै २०५२ सालमा **कौत्सस्य गुरुदक्षिणा** प्रस्तुत भएको थियो। जयतु संस्कृतम् आन्दोलन २००४ को स्वर्णमहोत्सवका अवसरमा राष्ट्रिय नाचघरमा २०५४ सालमा **भगवदज्जुकम्** नाटक प्रस्तुत गरिएको थियो भने २०५४ सालमा नै **रागविरागम्** प्रस्तुत गरिएको थियो। २०५५ सालमा **शार्दूलसम्पातः**प्रस्तुतगरिएको थियो।यसै समयमा २०५८ सालमा प्रज्ञाको प्रेक्षालयमा नाट्यमहोत्सवमा **त्रिशूलप्रहारम्** प्रस्तुत भयो भने २०६१ सालमा **भगवदज्जुकम्** २०७० सालमा डीएभी विद्यापीठ, ल.पु.मा **अस्तव्यस्तम्,** र २०७२ सालमा वाल्मीकि विद्यापीठमा अस्थायी रूपमा निर्मित प्रेक्षालयमा प्राडा. ऋषिराम पोखेलबाट रचित **स त्वम् अहम्,** र अन्य कसैको **धिक् मदनम्** (नाटक पनि प्रस्तुत भएका थिए। २०७६ सालमा सर्वनाम प्रेक्षालयमा कान्तिभैरव गुरुकुलले तोयनाथ पाण्डेको **तमसो ज्योतिषि** नाटक देखाएको थियो। २०८१ चैत्र २६ र २८ गते पर्यटन बोर्डको प्रैक्षालयमा प्रा.डा. नवराज कट्टेलबाट रचित नारी शिक्षा र जागरणमा आधारित **प्रतिष्ठा** नाटक पनि कान्तिभैरव गुरुकुलले प्रदर्शन गरेको थियो। प्रा शिवहरिमरहट्टा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विश्वविद्यालयको उपकुलपति भएपछि (२०६८-७१) एक नाटक समिति पनि बनाइएको थियो। यस समितिद्वारा पनि डिएभिकलेजको सभाकक्षमा **कुमारसंभव भावाभिनय** प्रस्तुत गरिएको थियो । यी कतिपय नाटकहरूको योजनामा घनश्याम खतिवडाको सक्रियता थियो भने भावाभिनयमा प्रा. विद्यानाथ उपाध्यायको सक्रियता रहेको थियो ।

यी नाटकहरूको प्रदर्शनमा प्रा. विद्यानाथ-उपाध्याय, प्रा.डा. ऋषिरामपोखेल, प्रा.डा. नवराजकट्टेलस्य, प्रा.डा.श्रीराम-अधिकारी, रङ्गकर्मी डा. घनश्याम खतिवडाको योगदान रहेको देखिन्छ। घनश्याम खतिवडा संस्कृत रङ्गमञ्चको निर्माणमा सक्रिय देखिन्छन्। संस्थागत रूपमा जयतु संस्कृतम् संस्थाको योगदान महनीय रहेको छ। यस्तै नेपाल संस्कृत विश्वविद्यालय र वाल्मीकिविद्यापीठका छात्रहरूको, कान्तिभैरव गुरुकुलका छात्रहरूको नाट्याभिनयमा योगदान रहेको पाइन्छ।

## ४.नेपालमा नाट्यरचना र नाट्यमञ्चनमा जयतु संस्कृतम् को योगदान

जयतु संस्कृतम् को गठनसंगै नाट्यप्रदर्शन सुरु भएको थियो। भगवदज्जुकम् नाटक त्यसवेला २०५४ सालमा राष्ट्रिय नाचघरमा देखाइएको थियो र त्यसको निर्देशन प्रा. विद्यानाथ उपाध्यायले गर्नुभएको थियो। त्यति मात्र होइन जयतु संस्कृतम् को नामकरण हुनुअघि पुरानो संस्कृत **नाटक समिति** नै पुनर्जीवित गर्ने प्रस्ताव पनि आएको थियो। नेपाल संस्कृत नाटक सङ्घ बनाउने कि भनी कुरा पनि चलेको थियो। पछि 'जयतु संस्कृतम्' संस्थाको नाम राखियो। संस्कृत जगत्का सबै काम यस संस्थाले गर्ने र जयतु संस्कृतम् आन्दोलन २००४ को संस्मरणलाई जीवित राख्ने लक्ष्य राखिएको थियो। नेपालमा हजारौँ सामाजिक र साहित्यक संस्था भए पनि संस्कृतको काम गर्ने सामाजिक साहित्यिक संस्था नभएको अवस्थामा यस संस्थाले काम गर्नुपर्छ भन्ने प्रतिबद्धता प्रकट गरिएको थियो।

जयतु संस्कृतम् संस्था २०५५ भाद्र २९ मा दर्ता भयो र यसले काम गर्न थाल्यो। स्वर्णमहोत्सव २०५४ सालमा **भगवदज्जुकम्** नाटक प्रस्तुत गरिएको थियो भने २०५४ सालमा नै **रागविरागम्** प्रस्तुत गरिएको थियो। २०५५



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सालमा **शार्दूलसम्पातः** *प्रस्तुत* गरिएको थियो ।यसै समयमा २०५८ सालमा प्रज्ञाको प्रेक्षालयमा नाट्यमहोत्सवमा **त्रिशूलप्रहारम्** प्रस्तुत भयो। ल.पु.मा **अस्तव्यस्तम्,** र २०७२ सालमा वाल्मीकि विद्यापीठमा अस्थायी रूपमा निर्मित प्रेक्षालयमा प्राडा. ऋषिराम पोखेलबाट रचित **स त्वम् अहम्,** र अन्य कसैको **धिक् मदनम्** (नाटक पनि प्रस्तुत भएको थियो। २०७६ सालमा सर्वनाम प्रेक्षालयमा कान्तिभैरव गुरुकुलले तोयनाथ पाण्डेको **तमसो ज्योतिषि** नाटक देखाएको थियो। २०८१ चैत्र २६ र २८ गते पर्यटन बोर्डको प्रेक्षालयमा प्रा.डा. नवराज कट्टेलबाट रचित नारी शिक्षा र जागरणमा आधारित **प्रतिष्ठा** नाटक पनि कान्तिभैरव गुरुकुलले प्रदर्शन गरेको थियो।

त्यसपछि जति पनि संस्कृतका नाटकहरूको प्रदर्शन भएका थिए त्यसमा कतै न कतै जयतु संस्कृतम् को भूमिका र सहयोग रहेको थियो। विगत २७ वर्षका अवधिमा दर्जनौँ नाटक मञ्चन भएका छन्, तिनमा संस्था जोडिदै आएको छ।

नेपालमा संस्कृत नाट्यसाहित्य अगाडि बढाउन २०७४ सालमा निर्णय गरेर नै विभिन्न लेखकहरूलाई नाटकको रचनाका निमित्त अनुरोध गरिएको थियो। तर नाटक आएका थिएनन्। कोभिड-१९ को समयमा सारा संसार बन्द भयो, नेपाल पनि बन्द भयो। सारा नेपालीहरू घरघरमा नै थुनिए। तर संस्कृत भने घरघरबाट भ्रमण गर्नथाल्यो। आकाश र धर्ती सबैतिर फैलियो। सामाजिक सञ्जाल र इन्टरनेटमा परिव्याप्त भयो। जयतु संस्कृतम् ले पनि अनेक काम गऱ्यो। संस्कृतभाषा प्रशिक्षण चल्यो ११५ दिन। कविगोष्ठी चल्यो २ र १ दिन। विचारगोष्ठी चल्यो,७ क्षेत्रमा ७ दिन। खण्डकाव्य, महाकाव्य र नाटकहरू लेख्न थालिए। अनि यसै क्रममा ६०।७० सानाठूला नाटक तयार भए। यसैको उपज यो लघुनाटक सङ्ग्रह पनि हो।

**(क) कर्मफलम्**लघुनाटक सङ्ग्रहः प्रा.डा. नवराज कट्टेलबाट यस नाटकको रचना भएको हो। **कर्मफलम्** नाटकमा (२१) लघुनाटक सङ्कलित छन्। रङ्गमञ्चको विचार गरेर यी नाटकहरूको रचना गरिएको छ। २।३ पृष्ठका नाटकदेखि २१।२२ पेजसम्म फैलिएका नाटक यसमा छन् भने नाटक सङ्ग्रह २६५ पृष्ठमा फैलिएको छ। त्यस्तै उक्त सङ्ग्रहमा सामान्यरूपका, मौनरूपक, एकालापीयरूपका र स्वप्नबिम्ब र मध्यारम्भ, शिलायित भएका नाटक पनि



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छन्। त्यस्तै ध्वनिमाध्यमबाट, प्रकाशमाध्यमबाट वाद्यवादनमाध्यबाट प्रस्तुत गरिएका विविध शैलीका नाटक पनि यसमा रहेका छन्। द्वन्द्वतत्त्व पर्याप्त मात्रामा पाइने नाटक, बिम्बात्मक, प्रतीकात्मक र दार्शनिकबिम्बयुक्त नाटक पनि यहाँ देख्न सकिन्छ।

यससङ्ग्रहका रूपकहरूमा विभिन्न कथास्रोतको प्रयोग गरिएको पाइन्छ । साहित्यदर्पणकारका अनुसार नाटकमा ख्यात, उत्पाद्य, मिश्र तीन किसिमका कथास्रोत हुन सक्छन्। कर्मफलं, अहङ्कारप्रशमनम्, महिषासुरवधम्, रक्तबीजम् योजनगन्धा, बालश्रापः, रत्नाकरः, वाजसनेयो याज्ञवल्क्यः, बुद्धस्य त्यागः, यी रूपकमा पुराण र इतिहासमा प्रसिद्ध कथानकबाट वस्तुको चयन गरिएको छ। अन्य रूपकहरूमा इतिहासबाट, व्यवहारबाट र कल्पनाप्रसूत पनि छन्। नेपालविजयम्, बहादुरशाहः, भानुभक्तमा ऐतिहासिक विषयवस्तु पाइन्छ। अन्य रूपकहरू व्यावहारिक र कल्पनाप्रसूत विषयमा आधारित छन्।

सत्यघटनामा आश्रित नाटकमा विश्वपिञ्जरम्, विगतासंज्ञा मानसी दुई नाटक छन्। यस्तै कल्पनाश्रितनाटकमाकामरूपः, कामरूपा, सङ्घातः, मौनम्, प्रेतात्मा, प्रतिष्ठा इत्यादि नाटक छन्। यस्तै गतचेतना मानसी, कामरूपः, कामरूपा रूपकमा शृङ्गारभावधारा रहेको पाइन्छ। प्रतिष्ठा २०८१ चैत्र २६ र २८ मा काठमाडौंको पर्यटनबोर्डको प्रेक्षागृहमा कान्तिभैरव गुरुकुलका विद्यार्थीहरूबाट मञ्चन पनि भएको छ।

**(ख) संस्कृतनाटिकाकौस्तुभः**

यस लघुनाटक सङ्ग्रहमा २८ वटा लघुनाटकहरूको सङ्कलन सम्पादन गरिएको छ। प्रस्तुत सङ्ग्रहमा संकलन भएका अधिकाँश नाटकहरूले संस्कृत वाङ्मय, पौरस्त्य संस्कृति, धर्म, दर्शन, जीवनपद्धति, शिक्षा, शान्ति आदिलाई विषय बनाएका छन्।यस्ता नाटकमा **स, त्वम् अहम्, गुरुकुलम्,** डा. छत्रपति दाहालको **दिनचर्या,** रामहरि दाहालका **कर्मसिद्धिः, शान्तिदूतम्, प्रत्यादेषणम् आदि रहेका छन्।** प्रा.डा. विष्णुप्रसाद देवकोटाको **गोरखकृपादृष्टिः, नैपालैकीकरणम्, सुगताभयदानम्** तीन वटा नाटक नै ऐतिहासिक विषयमा आधारित देखिन्छन्। तोयनाथ पाण्डेको **मातृहत्याधारम्,** प्रा. रामहरि दाहालको



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**शान्तिदूतः, प्रत्यादेषणम्** प्रा. नवराज कट्टेलको **योजनगन्धा**, आदि नाटकहरू पौराणिक विषयमा आधारित देखिन्छन् ।डा.कृष्णप्रसाद भट्टराईको **अङ्गुलीमालः** बुद्धसन्देशमा आधारित छ ।

नेपालको समसामयिक समस्यामा आधारित भएर डा. चन्द्रमणि नेपालको **विदेशयानम्,** महानन्द तिमल्सिनाको **जीवेत् सदा संस्कृतम्,**यदु पन्थीको **प्रेमविवाह**, प्रा. .नवराज कट्टेलको **प्रतिष्ठा,** नवराज पाण्डेको **प्रश्चात्तापः, ध्रुवप्रसाद भट्टराईको निशापुरेशायनम्,** पिप्पलमणि सिग्देलको **पौरस्त्यसंस्कृतिः** डा.वद्री पोखेलको **प्रत्यागमनम्,** डा.भवानीशङ्कर भट्टराईको **रोगात् त्रासो भयावहः** आदिको रचना गरिएको देखिन्छ ।

**(ख) पूर्णाङ्गी नाटक** : नारायण प्रसाद शास्त्रीको **नेपालमाता** आएको छ । यस नाटकमा राणाशासनको कठोरता, विद्रोह, सहिदहरूको वीरतको चित्रण, क्रान्ति प्रजातन्त्रको उदयका कथा निवद्ध छन् । कवि रामहरि दाहालका **आचारिकम्** मा स्मृतिकार लिखितको आचारको कठोरतापूर्वक पालना गरेको र स्वयं दण्डको याचना गरेर दण्डित भएको कथानक आएको छ । **सत्प्रभावम्** नाटकमा रत्नाकर जस्तो डाँकु पनि नारदको सङ्गतले आदिकवि र महान् ऋषि बन्न पुगेका छन् । **गुरुकुलचर्यम्** नाटकमा गुरुकुलको शिक्षा र व्यवहार प्रणालीमाथि प्रकाश पारिएको छ । **दृष्टिसृष्टिमा** महाभारतीय घटना प्रस्तुत गरेर दृष्टि अनुसार सृष्टि-व्यवहार हुने कुरा प्रस्तुत गरिएको छ । दाहालका ४ पूर्णाङ्गी नाटक छन् । आचार्य खेमराज केशवशरणको **मित्रसङ्गम** नाटकमा सुदामा र कृष्णमिलनको पौराणिक कथा प्रस्ततु छ । प्रा.डा.विष्णुदेवकोटाको **कृष्णागारोज्जीवनम्** नाटकमा चौरङ्गीनाथको राजकुलमा जन्म, वृद्धि, संकट र गोरखनाथबाट दीक्षा लिई तपःसाधनाबाट सिद्ध भई ८४ सिद्धमा स्थापित भएको सन्दर्भ प्रस्तुत छ । यी नाटकहरूको लेखन र प्रकाशनमा जयतु संस्कृतम् संस्थाको महनीय भूमिका रहेको छ । यसमा पितृदण्डित कृष्णागार गोरखकृपाबाट कसरी सिद्ध भए भन्ने कुरा देखाइएको छ । यी सात वटा संस्कृत नाटकहरूको संकलन र सम्पादनमा जयतु संस्कृतम् को अतुलनीय योगदान रहेको छ ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## ५. प्रकृत नाटकका रचनाकार र रचनासन्दर्भ

गोरखा जिल्लाको लिगलिगकोट, राउतेपानी गाउँमा जन्मिनुभएका (२००८, ज्येष्ठ मास २८ गते) नाटककार प्रा.डा. विष्णुप्रसाददेवकोटा संस्कृतव्याकरणका आधिकारिक विद्वान् हुनुहुन्छ। नेपाल संस्कृत विश्वविद्यालयमा उहाँले २०३६ सालदेखि ३५ वर्ष ६ महिना पढाउनुभएको छ भने यस अवधिमा उहाँले थुप्रै लेखरचनाको आलेखन र परीक्षानियन्त्रकसमेत भएर प्रशासन चलाउनुभएको बुझिन्छ। प्रारम्भिक शिक्षा घरमा नै लिएर अयोध्याबाट शास्त्री र बनारसबाट संस्कृत व्याकरण र संस्कृत साहित्यमा आचार्य गर्नुभएको छ। देवकोटाजीले २०५२ सालमा तात्कालिक महेन्द्र संस्कृत विश्वविद्यालयबाट **'प्रक्रियासिद्धान्तकौमुद्योस्-समीक्षणात्मकमध्ययनम्'** विषयमा शोधकार्य गरी विद्यावारिधि -(पिएच.डी) उपाधि प्राप्त गर्नुभएको हो। उहाँले प्राध्यापकीय जीवनमा व्याकरणको विभागाध्यक्ष, परीक्षानियन्त्रक, विश्वविद्यालय सभाध्यक्ष, प्राज्ञिक परिषद्को अध्यक्ष आदि पदमा रहेर पनि संस्कृतको सेवा गर्नुभएको देखिन्छ। जयतु संस्कृतम् संस्थामा दाङमण्डलको अध्यक्ष भएर होस् वा केन्द्रीयसमितिको उपाध्यक्ष भएर होस् संस्कृतका अनेक काममा उहाँको भूमिका र योगदान महनीय रहेको छ।

जयतु संस्कृतम् संस्थाबाट उहाँको **नेपालगौरवं महाकाव्यं** (२०७८ वैक्रमाब्द) **गोरखकृपादृष्टिः, नैपालैकीकरणम्, सुगताभयदानम्** यी तीन लघुनाटक संस्कृतनाटिकाकौस्तुभमा प्रकाशित भएको छ। चाडपर्व र संस्कृति (२०८०), **साहित्य र विद्वत् संस्मरण** (२०८१) जस्ता कृति पनि प्रकाशित छन्। संस्कृतमा **निपातोपसर्गविमर्शः, व्याकरणशास्त्रस्य वैय्याकराणानाञ्च इतिवृतम्, साहित्यशास्त्रस्य साहित्यशास्त्राणाञ्च इतिवृत्तम्, नेपाली भाषामा** हितोपदेश तथा **पञ्चतन्त्रका रोचक र शिक्षाप्रद कथाहरू** (२०८२), इत्यादि ग्रन्थ प्रकाशनको प्रतीक्षामा रहेका छन्

नेपाल संस्कृत विश्वविद्यालयको अनुसन्धानात्मिका **ऋतम्भरा** पत्रिका, **संस्कृत कवितासङ्ग्रह** भागएक, भाग दुई, जयतु संस्कृतम् पत्रिका, जयतु संस्कृतम् संस्थाबाट प्रकाशित **संस्कृतनाटिकाकौस्तुभम्,** जयतु संस्कृतम् संस्थाबाट प्रकाशित संस्कृतका **कर्मफलम्** लगायतका सबै ग्रन्थहरूको प्रकाशनमा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवकोटा गुरुवरले भाषा सम्पादनको महत्त्वपूर्ण कार्य गरेर महनीय भूमिका वहन गर्नुभएको छ।

प्रा. देवकोटाले कोभिड-१९ कालमा एकाङ्की नाटकहरू लेख्ने अभियान चल्दा चलाउँदा नेपालगन्जमा पुत्र र पुत्रबधूका साथ रहनुहुन्थ्यो। त्यस समयमा त्यहाँ रहँदा ४ वटा एकाङ्की नाटक र महाकाव्यको लेखन र परिष्कार गरिरहनुभएको थियो। सो एकाङ्कीमध्ये **कृष्णागारोज्जीवनम्** पनि थियो तर त्यसको अर्कै नाम थियो। एकाङ्की पनि लामै थियो र घटनाको तारतम्य पनि लामै थियो। त्यसैले मैले त्यसलाई एकाङ्कीका रूपमा नभएर नाटककै रूपमा पुनः लेखन र नाट्य संघटनमा मिलाउन अनुरोध गरेँ, गुरुवरले पनि त्यस आग्रहलाई स्वीकार गरेर नाटकको स्वरूपमा यसलाई ढाल्नुभयो। अहिले यो हाम्रो हातमा नाटकको रूपमा प्राप्त भएको छ।

## ६. प्रकृत नाटकमा वस्तु, नेता र रसको सन्दर्भ

(क) **वस्तु र नेताको सङ्घटन**- प्रस्तुत नाटकमा कृष्णागारलाई नायक बनाई वस्तुविन्यास गरेको देखिन्छ।कृष्णगारका पिता शमसार दाक्षिणात्य कृष्णानदीको तटवर्ती विजयबाडा क्षेत्रका राजा थिए। उनी अपुत्रत्वका कारण दुःखी भए। राजाकी शीलस्वभावकी रानी थिइन् मन्दाकिनी। अनेक उपायबाट पनि सन्तान नभएपछि मन्त्रीको काँधमा राज्यभार सुम्पिएर जङ्गल गए। त्यहाँ कृष्णानदी थियो। कठिन तपस्यापछि रानी गर्भवती भइन्। गर्भमास पूरा भएपछि छोरो जन्माइन्। कृष्णाकै तटमा जन्मिएकाले उनको नाम पनि कृष्णागार राखिएको थियो। तर कडा रोगका कारण जन्मिएको १४ वर्षमा आमाको देहान्त भयो। राजाले विभिन्न उपायबाट छोरोको पालनपोषण गरे· गराए। केही वर्षपछि राजाले चित्रकूटका भुजकवच नामका राजाकी छोरी भुजावतीसंग बिहे गरे। राजाले नयाँ रानी र छोरालाई भेट गराउन चाहेनन्। उता राजाले छोरो छन् पनि भनेका थिएनन्। राजपुत्रको निवास टाढै व्यवस्था गरियो। सौतेनी आमाको र कृष्णागारको भेटघाट र चिनजान हुन पाएन।

केही कालपछि राजपुत्र पनि युवा भए। सानै उमेरमा बिहे गरिएकी भुजावती पनि राजदरबारको सुविधा र सेवाले हलक्क भइन्। यौवनसुलभ गुण विकसित



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भए। तर राजा र रानीको उमेर फरक नै थियो। रानी भोगैषणावृत्तिवाट ग्रसित थिइन्। राजा भने कहिले राजकाजमा व्यस्त, कहिले शिकारमा कहिले केमा। भोगको स्वाद अलि अलि पाएकी तर तृप्त हुन नपाएकीले भोगको चाहना उग्र थियो। केही दिनका लागि राजा शिकार खेल्न बन गएका थिए। संजोग त्यसै दिन भुजावतीको आँखा तिनै युवकको सुन्दर शरीरमा पऱ्यो। दासीलाई भनेर उनले युवकलाई आफ्नै खोपीमा झिकाइन्। दुवै जनाको संवाद भयो। रानीले भोगका लागि आह्वान गरिन्। तर राजपुत्रले लख काटे, यिनी पिताका दोस्री पत्नी हुन् मेरी कान्छी आमा। अनि रानीको आग्रहलाई अस्वीकार गरे। तर रानी उग्र भइन्। राजकुमारले आफू समसारको छोरा भएको बताए, रानीलाई आमा मान्नुपर्ने बताए। त्यसपछि रानी झसङ्ग भइन्। आफ्नो कुकृत्यलाई ढाकछोप गर्न उल्टै राजपुत्रले नै आएर भोग गर्न बलजफती गरेको कुरा राजा फर्किएपछि सुनाइन् र कृष्णागारलाई दण्ड दिलाइन्। राजाले सत्यासत्यको परीक्षण नै नगरी दण्ड दिए। रानीले एउटै मट्याङ्ग्राबाट दुईटा काम गरिन् आफ्नो चरित्रको सुरक्षा र भविष्यको सन्तानको राजगद्दीको रक्षा।

कृष्णगार दण्डित भए, हातखुट्टा दुवै काटिए र चौरास्तामा मिल्काइए। ईश्वरको प्रेरणाले गर्दा त्यही बाटो हिडिरहेका मत्स्येन्द्रनाथ र गुरुगोरखनाथको आँखा तिनै कृष्णागारमा पऱ्यो। गोरखनाथको आशीर्वादले कृष्णागारको हातखुट्टा दुवै पलाए। दरवार जाऊभन्दा उनले मानेनन्। शिष्यत्वको अभ्यर्थना गरे। मन्त्र सुनी दीक्षा लिएर लामोसमयसम्म तपस्या गरी सिद्ध भए। अनि उनी ८४ सिद्धमा एक भएर रहे। कृष्णागारको जन्म, वृद्धि, संकट, करपादको छेदन, गोरक्षनाथको आशीर्वादबाट पुनः उत्थान भई सिद्धत्वमा पुगेर कथा टुङ्गिएको छ।

**अ) पञ्चसन्धिको अवस्था** : नाट्यकाव्यको प्रबन्धविधानमा वस्तु, नेता र रस महत्त्वपूर्ण मानिएका छन्। वस्तुले कथानकलाई र नेताले चरित्रलाई बुझाएको देखिन्छ भने रसले काव्यको उद्देश्य र चरम उपलब्धिलाई संझाएको छ। चरित्रको तुलनामा कथावस्तु बढी मूर्त हुने हुँदा पूर्वीय र पाश्चात्य दुवै क्षेत्रका विवेचकहरूले वस्तुलाई नै प्रबन्धविधानको मूल आधार मानेको पाइन्छ। नाटकमा पञ्च अर्थप्रकृति, पञ्चकार्यावस्था र पञ्चसन्धिको प्रयोग हुने कुरा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भरतदेखि नै चर्चामा आएको देखिन्छ। प्रबन्धविधानसंग जोडिएका छन् - अर्थप्रकृति बीज, बिन्दु, पताका प्रकरी र कार्य गरी ५ छन् (साहित्यदर्पण, ६।६४)[1]। वस्तुका ५ कार्यावस्था छन् : आरम्भ, यत्न, प्राप्त्याशा, नियताप्ति र फलागम (साहित्यदर्पण, ६।७१)[2]। यी दुई पक्ष उछिट्टिएर विपरीत मार्गमा नजाउन् भन्नका लागि र सन्तुलित समवायबाट नाट्य वा काव्याङ्ग तयार होस् भन्नका लागि पञ्चसन्धिको प्रयोग गरिन्छ। पञ्चसन्धि पनि पाँच नै छन् : मुख, प्रतिमुख, गर्भ, विमर्श र निर्वहण (साहित्यदर्पण, ६।७५)[3]। यी पञ्चसन्धिले वस्तुको कार्यावस्था र अर्थप्रकृतिलाई जोड्ने रसायनको काम गर्दछ र काव्याङ्गलाई सुगठित, सुव्यवस्थित, कलात्मक संरचना प्रदान गर्दछ।

| पाँच अर्थप्रकृति | पञ्चसन्धि | पाँच कार्यावस्था | अङ्ग र कार्यावस्था |
|---|---|---|---|
| बीज | मुख, | आरम्भ | अङ्ग १ पुत्रेच्छा, घटनारम्भ, जन्मबीज |
| बिन्दु | प्रतिमुख, | यत्न | अङ्ग २, ३ र ४ तपश्चरण र पुत्रलाभ |
| पताका | गर्भ, | प्राप्त्याशा | अङ्ग ५, ६ र ७ मा सङ्कटको सृजना |
| प्रकरी | विमर्श | नियताप्ति | अङ्ग ८ गोरखनाथको आशीर्वाद |
| कार्य | निर्वहण | फलागम | अङ्ग ९ तपःसिद्धि, चौरङ्गीनाथ (८४. सिद्धमा १ गनिए) |

**(ख) रसको सन्दर्भ** - यस नाटकम शान्तरसको प्रयोग भएको छ। शान्तरसमा शम वा निर्वेद स्थायीभाव हुन्छ। दुःखपूर्ण सांसारिक प्रपञ्च यसको आलम्बन

---

[1] बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ॥ अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधिः। ६४। ।६५।

[2] आरम्भयत्नप्राप्त्याशानियताप्तिफलागमः। भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ।६।७१

[3] समुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः। इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते। साद.६।७५।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभाव हुन्छ। ईश्वर, तीर्थस्थल, मठमन्दिर, सत्सङ्ग आदि उद्दीपन विभाव हुन्छ। रोमाञ्चकता, अश्रुपात, मोह आदि अनुभाव हुन्। निर्वेद, स्मरण, हर्ष आदि व्यभिचारीभाव हुन् (सा.दा.३/२४५–२४९)४। यस नाटकमा रसपरिपाकलाई नाटककारले त्यति जोड नदिए पनि रसको सन्दर्भ पाइन्छ। सिद्ध चौरङ्गीनाथको जन्म नै राजारानीको कृष्णा तटमा तपश्चर्या र शिवको आशीर्वादबाट भएको छ। षोडश संस्कार पनि राम्रोसंग सम्पादित छन्। आमाको मृत्यु र शमसारको दोस्रो बिहेभएपछि रानी भुजावतीको भोगेच्छालाई अस्वीकार गर्दाकान्छी रानीको षडयन्त्रमा परी उल्टै कृष्णागार दण्डित हुन्छन्। उनी सच्चरित्रका त थिदैथिए, अब चरम वैराग्यको उत्पत्ति भयो भने गोरक्षनाथबाट दीक्षा लिई तपः सिद्धि गरे। यी सबै घटनाको वर्णनमा निर्वेद स्थायीभाव भएको शान्तरसको भावध्वनि व्यक्त भएको अनुभव हुन्छ। दासी र रानीको, कृष्णागार र रानीको संवादमा शृङ्गारभाव, कृष्णागारको करपाद छेदन, मत्स्येन्द्रनाथ र गोरक्षनाथ एवं कृष्णागारको संवादमा करुणभाव व्यक्त भएको पाइन्छ। वनदेवी र गोरखनाथको संवादमा पनि शान्तभाव नै देखिन्छ। अन्तिमको निम्न श्लोबाट पनि शमभावकै बोध हुन्छ। यसलाई भरतवाक्य त भनिएको छैन तर त्यस्तै भाव चाहिँ प्रकट भएको छ -

प्रवर्त्ततां राष्ट्रियगौरवोन्नतिः
सुमोदतां वैदिकधर्मसंस्कृतिः।
महीयतां प्रोन्नतसंस्कृतस्थिति-
र्विवर्धतां गोरखवर्त्मवल्लरी॥

## ७. नाट्यशिल्प

**(क) नाट्यरचना :** यस नाटकको रचनामा ९ अङ्कको प्रयोग गरिएको छ। अर्थप्रकृति र कार्यावस्थाको बिचको सङ्गतिलाई पञ्चसन्धिका आधारमा अझै राम्रो गर्न सकिने स्थान छन्। नाटकले पौरस्त्य नाट्यशैलीलाई पछ्याएकाले प्रस्तावना र संवाद तदनुसार छन् भने अन्त्यमा भरतवाक्यम् चाँहि समावेश गरिएको छैन। नाटककारले मञ्चव्यवस्थापन, वस्त्राभूषण, प्रकाशव्यवस्था, ध्वनिव्यवस्था आदिमा भन्दा कथ्य र संवादमा ध्यान दिएका छन्। नेपथ्योक्ति, स्वगतकथन, सर्वश्राव्य, नियतश्राव्य, जनान्तिकजस्ता संवादमा त्यति ध्यान



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिएको देखिँदैन, सर्वश्राव्य संवादले प्रमुखता पाएको छ। आङ्गिक, वाचिक, सात्त्विक र आहार्य ४ अभिनयमध्ये वाचिकले नै प्रधानता पाएको देखिन्छ। नाटकमा द्वन्द्वयोजनाको महत्त्व रहन्छ। शमसार र कृष्णागारका बिचमा दृश्य अदृश्य द्वन्द्व छ भने भुजावती र कृष्णागारका बिचमा मनोवैज्ञानिक र सामान्य द्वन्द्व देखिन्छ।रङ्गनिर्देशमा पनि रचनाकारले त्यति ध्यान दिएका छैनन्, संस्कृतनाट्शैलीमा त्यता त्यति ध्यान दिने परम्परा पनि छैन।

**(ख) भाषाशैली:** भाषाशैलीको कुरा गर्दा रचनाकार व्याकरणशास्त्रका आधिकारिक विद्वान् मानिन्छन्। त्यसो हुनाले साहित्यिक भाषाको बहावभन्दा व्याकरणिक भाषाशैलीको प्रभाव रहेको देखिन्छ। तर रचनाकार साहित्यका पनि विद्यार्थी हुन्, त्यसैले गर्दा कविको भाषामा विचार र भावनाको कोमलता पाइन्छ। संस्कृतमा गद्य पद्य दुवैको प्रयोग गर्न सकिने भए पनि नाटककारले यहाँ गद्यकै बहुधा प्रयोग गरेका छन्, पद्यप्रयोग नगण्य रहेको देखिन्छ। जस्तो यहाँको भाषा प्रवाहशील छ :

**'भो राज्ञि ! किमिदं करोषि, केन पाप्मना ईदृशीमवस्थां प्रापितासि त्वम् ? केनापि तवोपरि कुदृष्टिः पातिता किम् ? तस्य यस्य कस्यापि लोचने लुञ्चामि, जिह्वामुत्पाटयामि, हस्तौ छिनद्मि। केनापि मृत्यून्मुखेन त्वं स्पृष्टा निन्दिता वा ? तस्य चरणद्वयमपि भनज्मि।'** यहाँ भाषिक प्रवाह, मृदुता, दृढता लययात्मकता आदिले नाट्यसंवादलाई निकै मिठो बनाएको छ।

## ८. वातावरण, प्रकृति र संस्कृति

**(क) वातावरण :** यस नाटकको वातावरण शमसारको दरवार परिसर, शमसारस्थित तपोवन, गङ्गातट, राजभवन, बैठक, रनीवास, चौबाटो, चौरङ्गीनाथको तपोवन आदि चित्रित छन्। वातावरणले स्थान र समयको माग गर्दछ। पात्र र चरित्र उभिने धरातल नै वातावरण हो। त्यसैले नाट्यरचनामा वातावरणको उपस्थिति रहेकै हुन्छ। यसको धरातल दाक्षिणात्य राजबाडाका राजाको दरबार, त्यहाँको सौन्दर्य, राजकाज, राज्यव्यवस्था, अमात्य आदिको सन्दर्भमा राज्यसंस्कृतिको विषय चित्रित छ। राजारानी तपश्चर्यामा जाँदा वनको वातावरण देखिन्छ। कृष्णाको तट, बोटबिरुवा वनस्पति, नदीनाला



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदिको सुन्दरता प्रकट भएको पाइन्छ। कृणागार तपश्चर्यामा लाग्दा पनि वनको वातावरण चित्रित छ। गोरखनाथ र वनदेवीको संवादमा पनि वनको वातावरण र वनको महत्त्वसमेत प्रकट भएको पाइन्छ। कालगत दृष्टिले हेर्दा गोरक्षनाथको समय देखिन्छ। घटना विहान, दिवा, सन्ध्या आदि समयमा घटित छन्। गोरखनाथको समय भनेको शैव परम्परा नै हो र यो गोरखपरम्परा अनादि परम्परामा जोडिएको देखिन्छ। आधुनिक अध्ययनका आधारमा लिच्छवि राजा नरेन्द्रदेवको पालादेखि गोरखनाथको उपस्थिति देखिन्छ। भारतीय साहित्यको अध्ययनले पनि ८ औँ, ९ औँ शताब्दीका सिद्धपुरुष मानेको देखिन्छ। गोरक्षासाहित्य पढ्दा पनि त्यसको संकेत छ।

**(ख) प्रकृति :** प्रस्तुत नाठकमा प्रकृतिको चित्रण विभिन्नरूपमा गरिएको। दोस्रो अङ्कमा प्रकृतिको यस्तो संकेत छ **'तत्र जलसौविध्यमये स्थले कृष्णातटे सघनाश्वत्थवृक्षस्य मूले निर्मिता पणकुटिर्दृश्यते। पुष्पोद्यानवत् प्राकृतिकी वाटिका दृश्यते। मृगशावकाश्च चरन्तः कूर्दमानाश्च दृश्यन्ते। तत्र वन्यः कलरवश्च श्रूयते।'**

वनदेवी र गोरखनाथको संवादमा पनि प्रकृतिको चित्रण र महत्त्व प्रकट भएको पाइन्छ। जस्तो- वनदेवीले **'भो योगिन्! सर्वमपि वनं मम भौतिकरूपमस्ति। अस्य मम भौतिकरूपस्य रक्षणं जनतया कर्तृतव्यमेव।'** भनेको देखिन्छ। त्यस्तै वनदेवीको मुखबाट यो श्लोक पनि प्रकट गरेर वनसौन्दर्यको स्वरूप प्रकट गरिएको छ।

**एकेन चापि तरुणाथ तरन्ति लोकाः पापात् क्षुधस्तपनकादपि दार्वभावात्।**
**भूमेश्च साधु पतनादपि वारभावात् किं काननस्य परिरक्षणतो न यत् स्यात्?॥**

**(ख) संस्कृति** : यस नाटकको कथानक नै संस्कृतिपरक रहेको छ। नाटक नाथपरम्पराको एउटा दस्तावेज बन्न पुगेको छ। नेपालको गोरखा जिल्लाको गुफामा कलियुगका गोरखनाथ प्रकट भएको कुरा पाइन्छ। देवकोटाकै महाकाव्य नेपालगौरवं मा सत्य, त्रेता, द्वापर र कलियुगमा कहाँ कहाँ गोरखनाथको आविर्भाव भएको थियो भन्ने वारेमा देवकोटाको सोही काव्यमा उल्लेख भएको पाइन्छ। गोरखनाथ सत्ययुगमा पन्जाबमा, त्रेतामा गोरखपुरमा,



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वापरयुगमा गुजरातको जूनागढीमा र कलियुगमा गोरखाको स्वर्णकूटस्थ गुफामा प्राकट्य हुनुभयो भनी उल्लेख गर्नुभएको छ।

**पाञ्चालके समुदितः सुयुगे तु सत्ये**
**गोरक्षके पुरवरे च युगे द्वितीये।**
**पश्चात्तने प्रथितगुर्जरजूनदुर्गे**
**तुर्ये तु कूटशिखरे स हि गोरखीये ॥** पूर्ववत् ९।१७॥

यसबाट गोरक्षा साहित्य र संस्कृतिको राम्रो छनक यस नाटबाट पाउन सकिन्छ। नाटकमा कृष्णागारको जन्मपछि संस्कार गरिएको छ र सो सन्दर्भमा षोडश संस्कारका विषयमा विमर्श छ। त्यसैले यो नाटक संस्कृति प्रयोगका दृष्टिले पनि महनीय बन्न पुगेको देखिन्छ।

## ९. नाट्यवस्तु र नाट्यसन्देश

नाट्यकथा केवल मनोरञ्जनको साधन मात्र होइन, आत्माको परिशोधन र पुनराविष्कारको यात्रासमेत हो। त्यस्तै यात्राको चित्रण हो - कृष्णागारोज्जीवनम् नाटक।

यस नाटकमा एक यस्तो पीडित तर आध्यात्मिक रूपमा उत्कर्ष पाएको पात्रको जीवन उजागर गरिएको छ, जसले अत्याचार, असत्य र अपमानको अग्निबाट पार पाउँदै, साधनारूपी तपोवनमा स्वयंलाई पुनर्जन्म दिन्छ र अन्ततः योगमार्गका एक महान् सिद्ध-पुरुष बन्छ।

कथाको प्रारम्भ दक्षिण भारतको विजयवाडा क्षेत्रस्थित शमसार नामक राजाको दरबारबाट हुन्छ। शमसारकी जेठी रानी मन्दाकिनी अत्यन्त सुशिला र तेजस्विनी थिइन्, तर दीर्घ समयसम्म सन्तान नहुँदा उनीहरूले कृष्णा नदीको किनारमा तपस्या गरे र एक पुत्रको प्राप्ति भयो- जसको नाम राखियो कृष्णागार।

बाल्यकालदेखि नै भिन्न प्रकृतिका कृष्णागार एक विचारशील, संयमी र आत्मीय बालक थिए। तर दुर्भाग्यवश, उनकी माता मन्दाकिनीको देहान्त भयो। तर



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पनि कृष्णागारलाई हुर्काइयो। उता राजा शमसारले पुनः विवाह गरे-एक कामुक र स्वेच्छाचारी रानी भुजावतीसँग।

एकदिन युवराज कृष्णागार दरबारमा देखिए। त्यो बेला राजा शिकारमा गएका थिए र दरबारमा थिएनन्। भुजावतीले सुन्दर र युवा कृष्णागारलाई देखेर कामुकताबाट उत्तेजित बन्न पुगिन् र युवकसंग भोगको सपना देख्न थालिन्। दासीका माध्यमबाट आफ्नै खोपीमा डाकी आफूसँग संसर्ग गर्न बाध्य पार्न खोजिन्, तर कृष्णागारले उनलाई मातृस्वरूपा मान्दै स्पष्ट इनकार गरे। भोगविलासमा अपमानित र असफल भइन् रानी। भय र बदलाको भावनाले भरिएर उनले उल्टै युवराजमाथि झूटो आरोप लगाइन् र राजा शिकारबाट फर्किएपछि कृष्णागारले आफूलाई भोगका लागि जबर्जस्ती गर्न आएको थियो भनी असत्य कुरा सुनाइन्।

रानी भुजावतीको असत्य कुरा सुनेर राजा विवेकविहीन बने। न त उनले छोरासँग सत्य बुझ्न चाहे, न त प्रमाण खोजे। आवेशमा आएर उनले आफ्नै छोराका दुबै हात-खुट्टा काट्न आदेश दिए र उनलाई चौराहेमा फाल्न लगाए। यहींबाट आरम्भ हुन्छ कृष्णागारको वास्तविक पुनर्जन्म।

चौराहेमा तडपिरहेका कृष्णागारलाई देखेर योगसम्राट गुरू गोरखनाथ प्रकट हुन्छन्। कृपादृष्टिले उनले कृष्णागारलाई उठाउँछन्, उपचार गर्छन्, नयाँ चेतना दिन्छन्। गुरु-शिष्य सम्बन्धको अद्वितीय उदाहरण प्रस्तुत गर्दै गुरुले उनलाई दीक्षा दिन्छन्। कृष्णागार गुरुकृपाबाट फेरि अङ्गसहित जागृत हुन्छन् र आफूलाई पूर्णतः साधनामा समर्पित गर्छन्।

वर्षौंको तपस्यापछि उनी पीडित अज्ञानी युवक रहँदैनन्- उनी चौरङ्गीनाथको रूपमा ८४ सिद्धमध्ये एक महान् योगीका रूपमा प्रतिष्ठित हुन्छन्। यस नाटकमा करुणा, अन्याय, मातृत्वको पवित्रता, युवराजको संयम, र गुरुकृपाद्वारा प्राप्त आत्मोन्नतिको चित्रण गरिएको छ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाटकमा विभिन्न स्तरमा संवादहरू गहिरा छन् र द्वन्द्वहरू पनि प्रभावपूर्ण छन्–

(क) कृष्णागार र भुजावतीबीचको नैतिक द्वन्द्व, यौनमनोवैज्ञानिक द्वन्द्व ।
(ख) राजा शमसार र छोराबीचको अन्धभरोसाको विस्फोट र अव्यक्त द्वन्द्व
(ग) गुरु र शिष्यबीचको अलौकिक सम्बन्ध, साधना र सत्यको अन्वेषण यी सबैले नाटकलाई प्रभावशाली बनाएका छन् ।

भाषाशैली संस्कृतमय भए पनि भाव सजीव र अन्तरमन छुने खालको छ। दृश्यहरू दरबारको ऐश्वर्यदेखि तपोवनको शान्तिसम्म, अनि चौराहेको कठोर यथार्थदेखि योगमार्गको उज्यालो यात्रासम्म फैलिएका छन् ।

यस नाटकको उद्देश्य केवल कथा भन्नु मात्र होइन, बरु -

(क) अनैतिकताको विरोध,
(ख) पितृपक्षको अन्यायको आलोचना,
(ग) संयम र शीलको महिमा,
(घ) गुरुको महत्त्व र गुरुकृपाको जीवनदायी शक्तिको प्रस्फुटन ।

अन्त्यमा नाटकले दर्शक वा पाठकको हृदयमा एउटा सन्देश छोड्छ –

(क) जीवनमा जस्तै कष्ट किन नआओस्, यदि धर्ममार्ग छोडिएन भने र योग्य गुरुको सान्निध्य पाइयो भने पतन पनि उत्थानको आधार बन्न सक्छ ।
(ख) यस नाटकमा दुःखान्त घटनासँगै सुखान्त सपना र समापन छ– किनकि चौरङ्गीनाथको जीवन स्वयं नै धर्म, शक्ति र साधनाको विजयको कथानक हो।अपमानित, दण्डित र भूपत्यक्त राजपुत्र कृष्णागार गुरु गोरक्षनाथको गुरुकृपाले एउटा महान् तपस्वी, सिद्ध र समाजको मार्गदर्शक बन्न पुगे ।
(ग) यसैले कृष्णागारोज्जीवनम् केवल एक पात्रको कथा होइन–यो आत्मबोध र अध्यात्मप्राप्तिको दार्शनिक दस्तावेज पनि हो, तपस्या, साधना र गुरुकृपाबाट दण्डित र सामान्य मानिसले कसरी आफूलाई उठाउन सक्छ, परमार्थ धर्मदेशना र समाज सेवामा लगाउन सक्छ भन्ने कुराको उदाहरण पनि हो यो ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(घ) गुरुवर्य गोरखनाथको महिमाको स्तुतिगान हो र पतनबाट उद्धारको जीवित उदाहरण पनि हो यस नाटकको पात्र, कथार घटना।

## कृष्णागारोज्जीवनम्

पात्रपरिचयः

१. राजा- शमसारनामा दाक्षिणात्यो राजा।
२. मन्दाकिनी- शमसारस्य राज्ञी।
३. कृष्णागारः(चौरङ्गी)- शमसारज्येष्ठपत्नीपुत्रः।
४. भुजावती- शमसारस्य द्वितीया पत्नी।
५. दासी- भुजावत्याः सेविका।
६. गुरुगोरखः- नाथसम्प्रदायस्य सिद्धः।
७. मत्स्येन्द्रनाथः- गोरखनाथस्य गुरुः।
८. अमात्यः- शमसारस्य प्रधानामात्यः।
९. वनदेवी- वनाधिष्ठात्री देवी।

प्रस्तावना

**सूत्रधारः-** नित्यं प्रणौमि गुरुगोरखसिद्धिराजं
श्रीशङ्करात् प्रसृतयोगविधेस्तु विज्ञम्।
योगस्य सिद्धिविभवेन हि छिन्नगात्रः,
कृष्णो बभूव सकलश्च हि यत्कृपातः॥

अद्य खलु केन रूपकाभिनयेन रङ्शालायामुपस्थितानां सुरभारतीसमाराधनतत्पराणां विद्वद्वराणामन्येषां सँस्कृतानुरागिणां रूपकप्रणयिनाञ्च मनोरञ्जनं ज्ञानवर्धनञ्च कुर्मो भो रसिके आर्ये ?

**नटी-** आर्य ! नवेन सँस्कृतप्रणयिना विद्याव्यसनिना च विष्णुप्रसाददेवकोटाभिधेन विदुषा विलिखितं कृष्णागारोज्जीवनम् इति शीर्षकान्वितं नवीनतथ्यबोधकं तवोक्तभावनानुरूपं नाटकं प्राप्तमिदानीं वर्त्तते। तेनैव विदुषां सँस्कृतप्रणयिनाञ्च मनोविनोदनं विधेयं प्रतिभाति मे।

**सूत्रधारः-** आर्ये ! तर्हि शीघ्रमेव याथातथ्येन तत्प्रदर्शयितुमभिनेतृगणान् वाद्यवादकाँश्च सज्जीकुरु।

**नटी -** भवदादेशस्य परिपालनं भविष्यति आर्य ! (नटी तथा करोति)।

(सर्वे निष्क्रान्ताः)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

# प्रथमोऽङ्कः

**राजा-** (स्वगतम्) शोचत्येकान्त उपवेशप्रकोष्ठे मदीयो वंशस्तद्वंश्योऽहञ्च सर्वपापनाशिन्याः कृष्णायाः परिसरवासी शमितसर्वशत्रुः समृद्धकोशो भगवत्पदारविन्दसेवी चानपत्यताग्रस्तः। मम पट्टाभिषिक्ता राज्ञी सर्वगुणसम्पन्ना भगवत आशुतोषस्य समाराधिकापि सन्तत्यभावादाधिग्रस्ता दुख्यतीदानीम् । (प्रकाशम्) भो देवि, किं कुर्वन्ती वर्त्तसे ? अत्रागम्यताम् ।

**राजा-** (स्वगतम्) शोचत्येकान्त उपवेशप्रकोष्ठे मदीयो वंशस्तद्वंश्योऽहञ्च सर्वपापनाशिन्याः कृष्णायाः परिसरवासी शमितसर्वशत्रुः समृद्धकोशो भगवत्पदारविन्दसेवी चानपत्यताग्रस्तः। मम पट्टाभिषिक्ता राज्ञी सर्वगुणसम्पन्ना भगवत आशुतोषस्य समाराधिकापि सन्तत्यभावादाधिग्रस्ता दुख्यतीदानीम् । (प्रकाशम्) भो देवि, किं कुर्वती वर्त्तसे ? अत्रागम्यताम् ।

**राज्ञी-** (आगत्य) किमर्थं मामाकारयसि आर्यपुत्र !? बहोः कालात् शोचसि त्वम् ।

**राजा-** त्वयाप्यनुभूतं भवेत् यदा कदा मां कथयसि चास्माकमपत्यानि नाभूवन्निदानीमपि। मम क्रोडं शून्यमेव भविष्यति, अस्माकं साम्राज्यमिदं को धारयिष्यति, किं तदर्थं यत्ना नाचरणीया इति ।

**राज्ञी-** तत्तु सत्यम्, मम कुक्षि रिक्तं तव चोत्सङ्गम् । अथ च त्वमहञ्च अपुत्र इति कथयिष्यावहे प्रजाभिः। किं न जानासि- सम्भावितस्य चाकीर्तिमरणादतिरिच्यते इति। अतोऽनपत्यतापरिहारायोपायाः समाचरणीयाः ।

**राजा-** शारीरिक उपचारोऽस्माभिः कृत एव। त्वया गर्भाशयशोधकानि पुत्रजीवकादीनि चौषधानि सेवितान्येव। मयापि वीर्यवर्धकानि तच्छोधकान्यौषधानि सेवितान्येव, परं फलं शून्यमेव जातम्। इतः परं वंशतन्तवे तप एवावशिष्यते, अथ च भगवदाराधनैव भगवतः प्रजेश्वरस्य कृपा चावशिष्यते। राज्यसञ्चालनव्यग्राभ्यामावाभ्यां न तपः सम्भाव्यते इति पुत्रो न प्राप्स्यते इति राज्यधुरं परिहाय तपसे वनमेव गन्तव्यम् ।

**राज्ञी-** राज्यसञ्चालनव्यग्रतामनुभवतोरावयोरत्रैव
राजप्रासादपरिसरेऽत्रासक्तिरहितं तपो न सम्भवति ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**राजा-** न सम्भवति देवि ! राज्यसञ्चालनस्य व्यग्रता हि अत्रास्माकं स्थितौ अस्मान् प्रभावयत्येव, तपसि चानन्यता न भविष्यति । अस्माकं कर्णौ स्तः, श्रोष्यतःशब्दान्, तौ न्यूनतां कर्त्तव्यताञ्च मस्तिष्कं ज्ञापयिष्यतस्तेनावां चञ्चलौ भविष्यावः । अस्माकमक्षिणी वर्त्तेते, ते तथ्यं कर्त्तव्यञ्च पश्यत एव । एवमन्यानि ज्ञानेन्द्रियाणि अस्मान् च्यावयिष्यन्ति तपसः । अतोऽत्र तपो न सम्भवत्येव, तत् सार्थकतां नास्मान् नेष्यति । अत एव राजप्रासादात् तत्समस्यातश्च दूरेऽरण्ये तत्र विलीनत्वमावश्यकम् ।

**राज्ञी-** अस्माकं पूर्वजा अपि सन्ततिहीनाः सन्त एवमेव तपोऽर्थं वनमेव गच्छन्ति स्म आर्यपुत्र !?

**राजा-** अथ किम् ? राजा दिलीपो गतवान् तपसा पुत्रप्राप्तये त्रेतायाम् । स तत्र गत्वा गुरोर्वशिष्ठस्य निर्देशानुसारेण नन्दिनीं सेवमानस्तत्सेवारूपतपसा पुत्रं रघुं प्राप्तवान् । सापत्नमातुः सुरुच्या अशिष्टव्यवहारेण वनं गतो ध्रुवो भगवन्तं स्वपितू राज्यञ्च कठिनेन तपसैव प्राप्तवान् । पुराणेषु तपसा साधितानि अनेकानि फलानि सन्तीति तपोऽर्थं वनसेवनं न नवीनमपूर्वञ्च ।

**राज्ञी-** राजन् ! तपसः किमपि सुबोधं लक्षणमस्ति, येन मादृशेन जनेनापि तत् सुबोध्यं स्यात् ? उचितया कठोरया तपस्यया सन्ततेः प्राप्तिर्भविष्यतीति कथं जानेऽहम् ?

**राजा-** कथन्नास्ति ? वर्त्तत एव लक्षणादिकम् ।

**राज्ञी-** किं तत् भो राजन् ? कृपया मद्धितार्थः समुल्लिख्यताम् ।

**राजा-** श्रूयतां भो महाराज्ञि ! मनुः कथयति-

यद् दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरम् ।

तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ इति ।

**राज्ञी-** अर्थो न बुद्धो मया सोदाहरणमर्थाप्यतां राजन् ! ।

**राजा-** श्रूयतां देवि ! यद्दुष्करम्- यथा भगीरथस्य गङ्गानयनम्, यच्च दुरापम्, यथा- पार्वत्या वरत्वेन शिवप्राप्तिः, यद्दुर्गम् यथा- ध्रुवस्य ध्रुवलोकप्राप्तिः, यच्च दुस्तरम् यथा- मार्कण्डेयस्य मृत्युरिति । एवं पुत्रस्य प्राप्त्यर्थं यत् कर्त्तव्यमस्ति तदपि तप इति बोद्धव्यम् ।

**राज्ञी-** एवं राज्यं राजप्रासादश्चास्माभिस्त्यक्तव्यमेव ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**राजा-** आम् देवि ! आलक्ष्यप्राप्ति तत् त्यक्तव्यमेव, अभीष्टफलाप्राप्तिपर्यन्तं सर्वं त्यजनीयमेव । अपरमस्माकं सँस्कृतिरारण्यकी भवति, तत्रैव सा प्राप्तमूला विवर्धिता च । सर्वा विशिष्टा उपलब्धयश्च ऋषिभिर्महर्षिभिर्मुनिभिश्चात्रैव समधिगताः । वेदास्तत्रैव श्रुताः, पुराणानि तत्रैवारचितानि पूरितानि च । धर्मशास्त्राणि चात्रैव व्यवस्थितानि अनुशासितानि च । एवमपूर्वाणि समाजव्यवस्थापकानि विधिनियमजातानि अत्रैव सम्पादितानि । हवनपरम्परासञ्चालनार्थं पूर्वमत्रैव हवनधूमैर्लतावृक्षाणां पत्राणि धूसरितानि । एवमुपलब्धयस्तत्रैव प्राप्स्यन्ते इति कठिनेन तपसा पुत्रोपलब्धये आवाभ्यां तपोवनं गन्तव्यमेव । त्वयापि अत्र निर्णये सहमतया भाव्यम् ।

**राज्ञी-** गम्भीरोऽस्ति विषयः । मयापि अत्र विषये सहमतया भाव्यमेव, नान्या गतिः । अहमस्मि राज्ञः पत्नी, पुत्रसम्प्राप्तियज्ञे पत्या सहैव पत्न्या भाव्यमिति पाणिनिः सूत्रयति- 'पत्युर्नो यज्ञसंयोगे' (४।१।३३) इति । तत् कथन्न गन्तव्यं तपसे वनं मयेति ?

**राजा-** एवमस्मदभावे राज्यसञ्चालनसन्दर्भे अमात्यशेखरैर्विमर्शः करणीयो नु राज्ञि ?

**राज्ञी-** करणीय एव विमर्शः, कथं राज्यमस्वामिकं स्यात् ?

**राजा-** (अमात्यशेखरमाकारयति) भो अमात्यशेखर ! किं कुर्वाणोऽसि, अत्रागम्यताम् ।

**अमात्यः-** (करशिरःसंयोगानुकूलव्यापारेण राजानं प्रणम्य) राजन् ! अहमत्रैवास्मि । केन हेतुना मां स्मरसि राजन् !

**राजा-** अद्य विशेषा अस्ति वार्त्ता । सा च मम वनगमनेच्छाप्रयुक्ता, त्वयि राज्यभारस्य विन्याससम्बद्धा च । मया प्रजारञ्जनेन सह कुलदेवा गुरवोऽतिथयश्च समाराधिता एव, तथापि मम पितरो लुप्तपिण्डोदका भविष्यन्तीति खिद्यते नश्चेतः । मम धैर्यस्य बन्ध इदानीं भग्न इव प्रतिभाति । मत्कृतेश्वराद्याराधना तपस्या चाल्पायिता इत्यहं मन्ये । इतोऽधिकायाः समाराधनायास्तपस्यायाश्च बाधिका राज्यसञ्चालनासक्तिरिति तां परित्यज्यास्मत्पूर्वजैरिव तपोवनं गन्तव्यमावाभ्यां समधिकाय तपस इति मम विचारः ।

**अमात्यः-** (हस्तौ सम्पुटीकृत्य नमन्) एतादृशो निर्णयो मा विधेयो राजन् ! सन्तत्यभावे दैहिकं कारणं किमपि स्यात्, वैद्यैः कविराजैश्च परीक्षिष्यते, तदर्थं तपस्यायै राज्यत्यागोऽनुचित इत्यहं मन्ये ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**राजा-** भो अमात्यशेखर ! भवत्कथनमपि अंशतः सत्यम्। परन्तु स उपायोऽनुष्ठित एव परं साफल्यं नाधिगतम्। अतोऽहमत्यन्तमाधिग्रस्तोऽस्मीति भवानपि जानीयात्। अहं राज्यशासनभारं भवर्ति विन्यस्तुमिच्छामि तपोऽर्थं वनगमनाय। त्वया समुद्यतेन कृतविमर्शेन च भाव्यम्।

**अमात्यः-** (प्रणमन्) राजन् ! एष निर्णयो मा विधेयः। किमर्थं राज्यश्रियं हातुमिच्छसि ? शत्रव इदानीं शान्ताः, कोशो बलञ्चेदानीं समृद्धमस्ति। मया च सावधानेन सतर्केण समनोयोगेन त्वद्धिताकाङ्क्षया च भवान् राज्यञ्च समाराधिते स्तः, मया नासावधानता विहिता वर्त्तते। किमर्थं राज्याद्विरक्तोऽसि। किमर्थ पुराणं कुलीनं समृद्धञ्च राज्यं हातुमिच्छसि ? सन्ततिप्रसूतिसमयोऽपि न व्यत्येति, किमर्थमाधिग्रस्तोऽसि ?

**राजा-** त्वया विज्ञेयमितोऽपि विरक्तिकारणम्, अहं पञ्चाशद्वर्षदेशीयो राज्ञी च मम एकचत्वारिंशद्वर्षाणि स्ववयसोऽतिक्राम्यति। इदानीमपि नास्त्यस्माकं सन्ततिः। पितृपिण्डदानाधिकारी राज्यस्योत्तराधिकारी च न वर्त्तत इदानीमपि। राज्यभारस्य वोढा उत्तराधिकारी नास्त्यावश्यकः ?। किमेतन्न वैराग्यकारणम् ? इदमेव तथ्यं श्लोकतेऽयं श्लोकः-

स्वाभाविकं निजकुलात्ययजं धृढाधिं
पिण्डावरोधकृतपैतृकतृप्तिनाशम्।
राज्यश्रियश्च विधिसम्मतपात्रलोपं
सम्भाव्य राजयुगलं व्यथते स्म नित्यम्॥ इति

**अमात्यः-** राजन् ! भूपतेः राज्यस्य जनतायाश्चोपरि महद्दायित्वं भवति। प्रजानां सेवयैव प्रसन्नो भवतीश्वरः। सन्ततिप्रसूनानि दास्यत्येव सः। सन्तानोत्पत्तेरवधिरपि अवशिष्यत एवेदानीमपि। अत्र विषये राजनेतृत्वस्य त्यागो नोपयुक्त इति प्रतिभाति मे। अथापि तदर्थं तपोवनं गन्तुमिच्छसि चेत्तत्र नाहं बाधको भविष्यामि, परन्तु साधक एव। मह्यं निर्देशनानि देयानि रक्षिष्यामि तव न्यासं मदाश्रयदम्।

**राजा-** भवान् ! कृतानुभवो बुद्धिमान् नीतिमाँश्चामात्यशेखरः। अन्येषु चामात्येषु यथायोग्यं कार्यविभागं विधाय् सुरक्षा-राजप्रासादसेवा-जनसम्पर्कविभागान् स्वयं सञ्चाल्य राज्यधुरं निर्वहतु भवान्। राज्ञोऽभावे राजप्रतिनिधिसभा स्थायिनी वर्त्तत एव। तस्या अपि सचिवः सन् तत्परामर्शेन विशिष्टायां परिस्थितौ मन्त्रिर्देशनञ्च गृहीत्वा सञ्चालयतु राज्यम्।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**अमात्यः-** राजन् ! भवदुक्तं सत्यम्। अथापि, चन्द्रमसा विना प्रकाशस्य किमस्तित्वम्, वृक्षस्य चाभावे छायायाः किमस्तित्वं भवति ? एवमेव भूपतेरभावे मन्त्रिणो राजप्रतिनिधिसभायाः किमस्तित्वं भवति भो राजन् ?

**राजा-** त्वया राजप्रतिनिधिना भाव्यम्। अथ च राज्ञां प्रच्छन्नशत्रवोऽपि भवन्ति। मदभावे तेषां प्रतिक्रिया का भवति ? सा त्वया सतर्केण बोधनीया, सत्यामावश्यकतायां प्रतिकर्त्तव्या च सा। पूर्वमपि भवता मदभावे राज्यं सञ्चालितमेव। तदनुभवेनापि राज्यसञ्चालनकार्यं सुकरं भविष्यति त्वत्कृते। इदानीञ्च मदभावो लम्बितो भविष्यति देवाराधनां सफलां विधायैवागमिष्याम्यहम्।

**अमात्यः-** भवतस्तर्षो महत्तमोऽस्ति परन्तु न मह्यं तद्वोचते गृहेऽपि तपसः सम्भवात्। प्रजारञ्जनं प्रजायाः कृते न्यायसम्पादनं दीनानाथानां सहयोगदानम्, अन्या मातृभूमिसेवा धर्मकृत्यानि च अत्रैव सम्भवन्ति अतस्तपोवनगमनस्य नास्ति तादृशी आवश्यकता मद्विचारे।

**राजा-** इदं सर्वं त्वत्कथनं सच्छासनाय कीर्त्तये च भवति। पुत्रप्राप्तये तु तपस्यैव समाचरणीया, अन्येषामुपायानामसाफल्ये। राजा दिलीपोऽपि गोसेवारूपं तप एव कृतवान् ईदृश्यां परिस्थितौ। तेनैव तपसा नन्दिन्याः प्रसादेन च रघुरूपं तपःप्रसूनं प्राप्तवान्, राजपरम्परा च निरन्तरायिता, पितृपिण्डलोपोऽपि नाभवत्। एवमेव ममापि भविष्यति भविष्यति।

**अमात्यः-** किं तपसे राजप्रासद उपयुक्तो न भवति महाराज ? स्थलविशेषो भवति कोऽपि तदर्थम् ?।

**राजा-** पारम्परीणमेवास्माकं तपोवनं तपःस्थली भविष्यति। तत्र च गते मयि असाधारणायामेव परिस्थितौ दूतद्वारा मत्सम्पर्को विधेयो न साधारणायां परिस्थितौ, अनावश्यकजनसम्पर्क स्तपोभञ्जको भवेत्। भगवान् शङ्करः सर्वस्वास्थ्यदो भास्करश्च मम मद्राज्यस्य च शङ्करिष्यत एव। शुभं तव राज्यसञ्चालनं सुकरञ्च स्यात्।

(तपोऽर्थं तपोवनगमनस्यामात्येनानुमतत्वेऽपि राजा शमसारः स्वकीये प्रकोष्ठे विचारमग्नो दृश्यते। तं विचारमग्नं राजानं दृष्ट्वा)

**राज्ञी-** किं शोचसि भो राजन् ! गभीरया मुद्रया ? किं प्रधानामात्यो नानुकूलः ? किमस्माकमुद्देश्यं निरुद्देश्यम् ?

**राजा-** सन्ततिप्राप्तिरूपमुद्देश्यन्तु वर्तत एव कथं निरुद्देश्यता ? त्वयापि पुत्राभावरूपं दुःखमनुभूतमेव भवेत्, त्वं प्रायः कथयसि चास्माकमपत्यानि न जातानि, मम कुक्षि शून्यमेव भवति, अस्माकं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साम्राज्यमिदं को धारयिष्यति इति तत्प्रपूर्त्तत्युन्मुखता नोद्देश्यम् ? किं तदर्थं गाम्भीर्येण न शोचनीयम्, किं तदर्थं यत्नो नाचरणीयः ?

**राज्ञी-** तत्तु सत्यम्, मम कुक्षि रिक्तं तव चोत्सङ्गम्। अथ चावामपुत्रौ इति निन्दकैः कथयिष्यावहे। भवानपि जानात्येव सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते इति। पिण्डलोपोऽपि गर्जत्येव। अत एव उपायस्त्वाचरणीय एव।

**राजा-** शारीरिक उपचारोऽस्माभिः कृत एव। त्वया गर्भशोधकानि चौषधानि सेवितान्येव। मयापि वीर्यवर्धकं तच्छोधकमौषधं सेवितमेव। न फलं दृष्टिगोचरमभूत्। अस्यां स्थितौ तप एवावशिष्यते। अनन्यभावेन भगवदाराधना भगवतः प्रजेश्वरस्य कृपा एव चावशिष्यते। राज्यसञ्चालनव्यग्राभ्यामावाभ्यां न प्राप्स्यते सेति राज्यधुरं विहाय वनं गन्तव्यमेव।

**राज्ञी-** राज्यसञ्चालनव्यग्रतां परिहाय अत्रैव राजप्रासादपरिसरे तपो न सम्भवति राजन् ?

**राजा-** न सम्भवति राज्ञि ! राज्यसञ्चालनव्यग्रता अत्रास्माकं स्थितौ अस्मान् प्रभावयत्येव। तपसि चानन्यता तल्लीनता न भविष्यति अत्र स्थितौ। अस्माकं कर्णौ स्तः तौ श्रोष्यतो भावाभावबोधकान् शब्दान्, विषयान्तराणि च। अस्माकमक्षिणी वर्त्तेते। ते रूपाणि तथ्यान्तराणि च पश्यत एव। एवमन्यानि ज्ञानेन्द्रियाणि अस्मान् च्यावयिष्यन्ति तपसः। अतोऽत्र राज्यं सञ्चालयन्तौ तपसा न फलान्वितौ भविष्यावः। अत एव दूरस्थेऽरण्ये विलीनत्वं तपसि अत्यावश्यकम्।

**राज्ञी-** अस्माकं पूर्वजा अपि सन्तानहीनाः सन्त एवमेव तपसे वनं गच्छन्ति स्म ?

**राजा-** कथन्न, राजा दिलीपो गतवान् पुत्रप्राप्तये वनम्। स तत्र गत्वा गुरोर्वशिष्ठस्य निर्देशानुसारेण वनमधिवसन् नन्दिनीं सेवमानस्तत्सेवारूपतपसा पुत्रं रघुं सम्प्राप्तवान्। सापत्नमातुः सुरच्या व्यवहारेण वनं गतो ध्रुवो भगवन्तं तत्कृपया पैतृकं राज्यं कठिनेन तपसैव प्राप्तवान्। पुराणेषु तपसा साधितानि अनेकानि फलानि सन्तीति अस्माकं तपोऽर्थं वनगमनं न नवीनमसाधारणञ्च।

**राज्ञी-** एवं राज्यं राजप्रासादश्चावाभ्यां त्यक्तव्यमेव सत्तपसे ?

**राजा-** आम् राज्ञि ! सत्फलप्राप्तये राजप्रासादस्तत्रत्या सुविधा च त्यक्तव्यावेव। अपरमस्माकं सँस्कृतिरपि आरण्यकी एव। तत्रैवास्माकं सनातनी सँस्कृतिः प्रादुर्भूता विवर्धिता प्रसृता च वेदास्तत्रैव श्रुताः, पुराणानि तत्रैव रचितानि, धर्मशास्त्राणि तत्रैव रचितानि समनुशासितानि च। एवमपूर्वाणि कार्याणि कृतानि। हवनधूमास्तत्रैव



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुत्पादितानि पुण्यजनकानि वृष्टिवर्धकानि च। अतएव हवनधूमैस्तत्र वृक्षलतानां पत्राणि धूलिधूसरितानि। एवमसाधारण्य उपलब्धयस्तत्रैव प्राप्स्यन्त इति पुत्रोपलब्धये आवाभ्यां तपोऽर्थमरण्यं गन्तव्यमेव।

**राज्ञी-** तर्हि गन्तव्यमेव वनं तपसे। तच्च तपः फलदं पुत्रदञ्च भवेदस्माकम्।

(ततः प्रधानामात्येन समयशुद्धये यात्रादिननिर्णयार्थञ्च ज्योतिर्विद आकारिताः। राज्ञोऽध्यक्षतायाममात्यशेखरस्य सचिवत्वे यात्रार्थं शुभं दिनं निर्धारितम्। तद्दिने यदि यात्रा विधीयते चेत्तपस्तदुद्देश्यञ्च सफलं भविष्यतीत्युद्घोषितञ्च। अथ च निर्दिष्टे दिने अमात्यशेखरोऽन्यैःसचिवैर्नागरिकैःकतिपयैः सैन्यबलै राजसेवकैश्च सह कृतमङ्गलौ राजदम्पती प्रेषयत्युदकान्तं राजधानीसीमान्तञ्च। ततश्च पारे नगरसीमान्तं राजदम्पती सचिवान् राजबलं राजसेवकाँश्च परावर्त्तयित्वा घोरं विपिनं प्रस्थितवन्तौ। राजप्रासादोऽनाथतां यात इवादर्शि प्रजाजनैः)।

## द्वितीयोऽङ्कः

(ततः कतिपयदिनानन्तरं तपोवनं तपःस्थलञ्च निर्धार्य ग्रामाज्जनसम्पर्काच्च दूरस्थे कृष्णायास्तटे उत्तमवने एकस्मिन् तौ वसतिं चक्रतुः। तत्र ज़लसौविध्यमये स्थले कृष्णातटे सघनाश्वत्थवृक्षस्य मूले निर्मिता पणकुटिर्दृश्यते। पुष्पोद्यानवत् प्राकृतिकी वाटिका दृश्यते। मृगशावकाश्च चरन्तः कूर्दमानाश्च दृश्यन्ते। दम्पत्योर्ललाटे त्रिपुण्ड्रतिलकं शिरस्युरसि च रुद्राक्षमाला अनामिकायां कुशपवित्रञ्च तावलङ्कृतवन्तो दृश्यन्तें। तत्र वन्यः कलरवश्च श्रूयते। कतिपयदिनान्येवमेव व्यतियन्ति स्म।)

**राजा-** अयि मन्दाकिनि ! अद्य रात्रौ उपब्रह्ममुहूर्त्तं मया सुस्वप्नो दृष्टः। आवां क्वचन नवीने मार्गे हिण्डमानौ वर्त्तामहे स्म। तत्र कश्चन लिङ्गी तेजस्वी आगच्छन् वर्त्तते स्म। स तेजस्वी धृतसंन्यासिवेशो धृतकमण्डलुर्ब्रह्मचर्येण सनाथितश्च दृश्यते स्म।

**राज्ञी-** (मध्ये एव) मयापि तादृशी एव शुभा सूचना स्वप्ने समधिगता। यत्रावां वसावस्ततः पूर्वत्र तृणशकलैराच्छन्नं शिवलिङ्गं लीनं वर्त्तते तदन्विष्यापसार्य चावरकतृणानि पूजय सश्रद्धमिति श्रुता देववाणी। सापि शिवलिङ्गप्राप्तौ चोपोद्बलकम्। ततस्ततो राजन् ?

**राजा-** सर्वगुणसम्पन्नः स संन्यासी प्रतीयते स्म। स आवां सम्भ्रान्तौ पद्भ्यां गच्छन्तौ दृष्ट्वा कथयति स्म- अग्रे घनघोरं



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

व्याघ्रभल्लुकादिसञ्कुलञ्चारण्यं वर्त्तते, तपसे समागतवन्तौ भवन्तावग्रे नैव गत्वा अत्रैव तरूत्तमे एकान्ते तपश्चरताम्। अत्रैवाश्वत्थवृक्षस्य विशालस्य कस्यचन परिसरे तेजस्वि शिवलिङ्गं भवेत्, इदानीं तत् प्रच्छन्नं भवेत् तदन्विष्य तदभिषेकाराधने कुरुतामिति।

**राज्ञी-** मया श्रुतया देववाण्या सह लिङ्गिकथनं सङ्गच्छते। तल्लिङ्गिकथनं सत्यं भवेत्, यतो हि शकुनशास्त्रे कथितं वर्त्तते-

देवता लिङ्गिनो गावः पितरो ब्राह्मणा नृपाः।
यद् वदन्ति नरं स्वप्ने तत्तथैव भविष्यति॥ इति

अतोऽग्रे न गमनीयमावाभ्याम्।
अत्रैव स्थित्वा तपश्चरणीयम्। लिङ्गिवचनं मिथ्या न भवति।

**राजा-** सत्यं शास्त्रीयञ्च कथनमभिहितं भवत्या।

**राज्ञी-** स्वामिन्! न गच्छामोऽग्रे। यत्रावामुषितवन्तौ ततोऽन्यत्र तरूत्तमं निर्णीय भूमिं परिमार्जयित्वा पर्णकुटीञ्च विधाय शिवङ्लिङ्गान्वेषणं विधेयमिदानीमेव। सति सम्भवेऽद्यत एवाशुतोषस्य शङ्करस्याराधना प्रारभणीया। संन्यासिरूपः शिव एव स भवेद् यस्यावाभ्यां पूजाभिषेकश्च करणीयः। (ततो राजा लिङ्गान्वेषणं प्रारभते)

**राजा-** राज्ञि गुल्मस्याधस्तात् तरुशाखाः परावर्त्य शुष्कपत्राणि परास्य च मनोयोगेन शिवलिङ्गमन्वेषयामि, भवती किं कुर्वती वर्त्तते?

**राज्ञी-** राजन्! अहं शिवलिङ्गं संन्यासिकथितमाकाशवाणीविबोधितञ्चान्वेषमाणास्मि। आर्यपुत्र! अत्र भवेच्छिवलिङ्गम्। (इति कथयन्ती स्थानं निर्दिशति) पतितानि शुष्काणि पत्राणि आवरणान्तराणि चापसारयति। अत्रोत्खननञ्च कर्त्तव्यं शिवलिङ्गप्राप्तये।

**राजा-** (हर्षेण) राज्ञि! अत्र मया सम्प्राप्तं शिवलिङ्गम्। अत्रागच्छ। आगत्य च मया सह प्रभाकान्तिभ्यां विलसितं शिवलिङ्गं पश्य। सश्रद्धं नमनं कुरु। अस्माकं मनोरथं पूरयिष्यति शङ्करिष्यति च शङ्करशिवलिङ्गरूपः।

**राज्ञी-** (औत्सुक्येन शिवलिङ्गं दृष्ट्वा) राजन्! विरम क्षणम्, अहं कृष्णानदीतो जलमानयामि शुद्धं पवित्रञ्च। तेन पयसा समभिषिच्य शिवलिङ्गस्य समाराधना विधेया। कृतसन्ध्यावन्दनस्यान्वेषणेन मलिनानि वस्त्राणि परिवर्त्य धौतवस्त्रादिकं परिधाय भवान् तत्परः स्यादहं जलसेकादिना पवित्रा भूत्वा शुद्धजलमानयामि। (राजा तथैव करोति, जलानयनाय राज्ञी कृष्णां गच्छति, जलमानयति च)।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**राजा-** गङ्गाजलं समानीतवती प्रिये ? शिवलिङ्गोपरि जलधारा त्वया कर्त्तव्या। अहञ्च रुद्रीमन्त्रान् पठामि। जलधारापश्चात् उत्तराङ्पूजा कर्त्तव्या। पूर्वं दीपस्य पूजा कर्त्तव्या भवतीति अनेन मन्त्रेण दीपः पूजनीयस्त्वया-

नमोऽत्वनन्ताय सहस्रमूर्त्तये..... इति।

कलशपूजने वरुण एवमावाहनीयो भवति-

मकरस्थं पाशहस्तमर्णसां पतिमीश्वरम्।
आवाहये प्रतीचीशं वरुणं यादसां पतिम्॥

श्रीगणेशमेवमावाहयेत् -

पाशाङ्कुशधरं देवं ध्यायेत् सिद्धिविनायकम्।
ध्यायेद् देवं महाकायं तप्तकाञ्चनसन्निभम्॥ इति।

**राज्ञी-** राजन् ! मया उत्तराङ्गपूजायाः कृते पूजासामग्री सम्पादिता। पुष्पाम्रपल्लवपिप्पलबिल्वादिपत्राणां सञ्चयनञ्च विहितमस्ति। अत्र कृष्णायास्तटे स्थित्वा त्रिकालसन्ध्यां त्रिकालपूजाञ्च सम्पादयामः। आवां सश्रद्धं प्रत्येकं दिने कृतस्नानसन्ध्यौ प्रातः शिवाभिषेकं तदर्चनां मध्यदिने राजभोगं सायञ्च रात्रिभोगारार्तिक्यादिकञ्च कुर्वः। एवं विधिपूर्वकं शिवार्चनायां कृतायां स अवश्यमेवावयोः मनोरथं पूरयिष्यति।

**राजा-** राज्ञि ! शिवसाधनायां पतिपत्न्यौ ध्यानमुद्रायां वसावः। पद्मासने सुखपूर्वकमुषितव्यम्। कति दिनानि, कति मासा लगिष्यन्ति न निश्चितम्। दम्पत्योरीदृशी समुपासना निरर्थकतां नैतीति मम निश्चयः।

**राज्ञी-** शिवस्य तपस्यायां जीवनमेव गच्छतु न तत्र चिन्तालेशः। आवयोर्जीवनं विवाहश्च गौरीशङ्करयोः प्रसादसिद्धिद्वारा समभवत्। त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये इति न विस्मर्त्तव्यम्।

**राजा-** आवां राजसिंहासनं परित्यज्य तपसे कृष्णातटे घोरारण्ये स्मः। ईश्वरो यत् कारयति तत् कुर्मो वयम्। सर्वमीश्वरवशगं भवति कल्याणि !

**राज्ञी-** स्वामिन् ! शिवप्रसन्नतासिद्धये इतः परं किं कर्त्तव्यम् ?

**राजा-** कल्याणि ! शिवप्रसन्नतासिद्धये तस्य ध्यानं विधेयम्, पूजा विधेया, मन्त्रोच्चारणञ्च विधेयम्। इदानीं मन्त्रोच्चारणं विधेयम्-

तन्मे मनः शिवसङ्कल्पमस्तु, नमः संभवाय च मयोभवाय च नमस्कराय च, नमः शिवाय च शिवतराय च

॥ इति। पटाक्षेपः।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## तृतीयोऽङ्कः

(कतिपयमासेषु पूजनेषु अभिषेकेषु च विहितेषु एकस्मिन् दिने शिवं प्रपूज्य सूर्यस्योपस्थापनवेलायां शिवप्रसादतः सूर्यस्यानुग्रहेण चैकस्तेजस्वी बालो मनसि स्फुरितः शमसारस्य पूजास्थले। तच्च तथ्यं राज्ञ्यै निवेदितम्। तद्रात्रौ च राज्ञ्या उदरे गर्भः स्थितः। गर्भवर्धनस्यावश्यकेषु मासेषु गतेषु शुभदिने शुभमुहूर्त्ते चैको बालः समजनि। राज्ञ्याः कुक्षि महाराजस्य च क्रोडं सनाथितम्। राज्ञी जातं पुत्रं दृष्ट्वा अतीव मुदिता। गद्गदकण्ठा वक्तुमपि नाशकत्। विशेषतो राज्ञा यदा तद्दिनस्य पूजायां समाप्तायां सूर्याय च अर्घ्यं प्रदाय उपस्थानं क्रियते स्म तदा एकः सुन्दरो बालो निजक्रोडे कल्पित आसीत्, स एवाद्य दृष्टिपथमागतवान्।)

**राजा-** राज्ञि ! पश्य भगवतश्शूलिनः सूर्यस्य च प्रसादात् आवयोस्तपः प्रभावाच्च तवोत्सङ्गेऽयं सुन्दरो बालः सम्प्राप्तः। भगवतः प्रसादादेवायं बालोऽस्मत्कृते प्रादुरभूदिति मे मतिः।

**राज्ञी-** स्वामिन् ! बालोऽयं तेजस्वी नवेन्दुरिव सौम्यः सुन्दरश्च दृश्यते। मनो मे हरतेऽयम्। आवयोस्तपस्या फलीभूता। ईश्वरीया आशीर्वादा आवयोरर्वषन्। स्वामिन् ! अस्य बालस्य सँस्कारः सम्पादनीयः। जातकर्म षष्ठिकापूजा एकादशेऽहनि नामकरणञ्च विधेयमस्माभिः।

**राजा-** राज्ञि ! अवश्यमेवास्य नवोदितस्य बालस्य सँस्कार आवयोः कर्त्तृत्वे मातापितृत्वे च विधातव्यः। कृष्णातटे प्रादुर्भूतस्य चास्य बालकस्य कृष्णागार इति नाम कर्त्तव्यमिति मदीया धारणास्ति। अधुना आवां प्राप्तलक्ष्यौ अत्यन्तं प्रसन्नौ च वर्त्तामहे। भगवति शङ्करे मृडत्वमीशानत्वम्, सूर्ये च भगवति विकर्त्तनत्वम्- दुःखनाशकत्वम्, पूषणत्वम्- अभावपूरकत्वञ्चास्तीति मन्यावहे। अत एव भगवन्तं शङ्करं सूर्यञ्च धन्यौ मन्यामहे।

**राज्ञी-** स्वामिन् ! अस्य बालस्य कृते पोषणस्य पयस आवश्यकतास्ति। निकट एव गोष्ठं भवेत्, तस्मिन् गोष्ठे दुग्धमत्यो गावो भवेयुः। ततो दुग्धं व्यवस्थापनीयम्। अहमुष्णोदकेन स्नानं कारयिष्यामि। कमनीयं वस्त्रमानेयम्। अधुना ममैव धौतवस्त्रं प्रयोगे समायाति।

**राजा-** प्रिये ! शृणोतु विशेषेण शीतिकण्ठस्याशीर्वादाद् बालो जातः। स एवेश्वरोऽस्माकं शङ्करिष्यति। तस्य सुरक्षा त्वयापि करणीयैव। चिन्ता न विधेया।

**राज्ञी-** (प्रसन्नवदना) भो आर्यपुत्र ! पश्यतु अस्मद्हृदयखण्डं बालचन्द्र इव प्रत्यहं वर्धमानं सौन्दर्यातिशयवन्तं राजकुमारम्। क्रोडे रक्षित्वा



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लालयामि स्नेहेन। भवानपि प्रेम्णा क्रोडे स्थापय, स्नेहेन पालय वात्सल्यञ्च प्रदर्शय।

**राजा-** (प्रसन्नो भूपतिर्नवं पुण्यप्रसूनं शिवसूर्यप्रसादं क्रोडे रक्षित्वा प्रसीदति लालयति च। अस्य बालस्य पूर्वतो गुरुभूतत्वञ्चायमनुभवति ) राज्ञि ! लालय पालय चैनम्, कापि समस्यास्य संवर्धने नागच्छेत्, अन्यासां दासीनां सेविकानाञ्चावश्यकता चेत् तद्व्यवस्था भविष्यति। मनोहरं तपःप्राप्तञ्च बालं सुरक्ष, त्वमपि सुखिनी स्याः, राजकुमारश्च पोषितो भवेत्।

**राज्ञी-** (बालं परिचुम्ब्य) स्वामिन् ! बालकोऽयं शुक्लपक्षस्येन्दुरिव प्रत्यहं वर्धमानो भविष्यति। लालनं पालनं पोषणं सेवनञ्च भवत्येव तस्य कृते दुग्धस्य पथ्यस्य च व्यवस्था करणीया भवता।

**राजा-** राज्ञि ! तस्य व्यवस्था भविष्यत्येव। यदा वयं राजप्रासादं गमिष्यावस्तदा अमात्या अन्ये प्रासादीयाश्च प्रसन्नाः सन्तो विशेषां व्यवस्थां करिष्यन्ति।

**राज्ञी-** (बालं विलोक्य) स्वामिन् ! मम मातापितरौ बालमिमं दृष्ट्वा अत्यन्तं प्रसन्नौ भविष्यतः। मम भगिनी अग्रजश्च सन्तुष्टौ भविष्यतः। मम सखायश्च मोदमाना भविष्यन्ति। अपूर्वं बालमिमं दृष्ट्वा राजप्रासादः पुष्पायिष्यते प्रफुल्लायिष्यते च। धन्यमस्माकं जीवनम्। धन्यमस्माकं राज्यम्।

**राजा-** (सोत्साहं सगाम्भीर्यञ्च) कल्याणि ! हर्षातिरेको न प्रदर्शनीयश्चिन्ता च नैव करणीया। स्वस्था भूत्वा तिष्ठ, पथ्यं भुङ्क्ष्व। स्वास्थ्यलाभं कृत्वा एनं पालय पोषय च। अस्माकं राज्यस्य भाग्योदयो जातः।

**राज्ञी-** (प्रसन्नवदना) राजन् ! पुत्रस्य कृते मातुर्मनसि यादृशी भावना भवति भवान् तां ज्ञातुं न प्रभवति। तां भावनां प्रकाशयितुं शब्दराशिरेव नास्ति मयि।

**राजा-** (बालं स्पृशन् परिचुम्ब्य च) शृणु, अस्य बालस्य सँस्कारः करणीयस्तत्र जातकर्म नामकरणञ्च करणीयम्। तदनन्तरमावां राजप्रासादं परावर्तिष्यावहे।

**राज्ञी-** स्वामिन् ! अवश्यमेव करणीयम्। अस्माकं प्रासादीयाः प्रतीक्षारता भवेयुः। राजकुमारं दृष्ट्वा प्रसन्ना भविष्यन्ति ते। राज्यस्योत्तराधिकारिणं युवराजमवलोक्य अस्मत्प्रजाश्च प्रसन्ना भविष्यति।

**राजा-** (प्रसन्नमुद्रया) अस्मद्राजकुमारे पञ्चविंशत्युत्तरे वयसि स्थिते एतस्मिन् राज्यधुरं विन्यस्य पुनश्चावां तपसे अत्रैव कृष्णातटे आगन्तास्वः



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सच्चिदानन्दस्वरूपं ब्रह्मसाधनं कृत्वा ईश्वरं लब्ध्वा जीवनं धन्यं कर्त्तास्वः ।

**राज्ञी-** इयं भाविनी वार्त्ता । राजन् ! इदानीं सँस्कारादि कर्म सम्पाद्यम् । ब्राह्मणाः समागताः । स्वस्तिवाचनमन्त्राः गणेशस्तुतयश्च गुञ्जन्ति । वाद्यध्वनिश्श्रूयते, पक्षिणां कलरवश्श्रूयते गन्तव्यं पूजामण्डपे । (इति तौ पूजामण्डपं गच्छतः।) (पटाक्षेपो भवति) ।

## चतुर्थोऽङ्कः

तपोवने राज्ञः पर्णकुट्यां जातसंस्कारादि कर्म कर्त्तुं कारयितुञ्च ऋषयो मुनयश्चागतवन्तो दृश्यन्ते । तत्र कर्मप्रारम्भात् पूर्वं राजा राज्ञी च जातसँस्कारादिविषये ऋषीन् मुनीन् तपस्विनश्च जिज्ञासेते । तत्र-

**राजा-** भो ऋषयस्तपस्विनो मुनयश्च ! अस्माकं सनातनधर्मावलम्बिनामनेके सँस्कारा भवन्ति । अयं सँस्कारज्ञानस्य तद्घटकानां ज्ञानस्य च समयोऽपीत्यहं मन्ये । तत्र सँस्कारसंख्याविषये मतान्तराणि सन्ति । तत्र कति भवन्ति सँस्काराः ? के च मतभेदका इति जिज्ञासाः पुरस्क्रियन्ते भवत्सु । तत्र

**कपिलमुनिः-** सुन्दराः सामयिकाश्च भवदीयाः प्रश्नाः । गर्भाधानादिकर्माणि सँस्कारा उच्यन्ते धर्मशास्त्रे । ते च गौतममते चत्वारिंशद्भवन्ति । जातुकर्ण्यस्य व्यासस्य च मते षोडश भवन्ति ।

**राजा-** ऋषे ! किं नाम सँस्कारत्वम् ?

**ऋषिः-** राजन् ! सामान्यतः सँस्कारा भूषणार्थका भवन्ति । अत एव भगवता पाणनिना प्रोक्तम्- 'सम्परिभ्यां करोतौ भूषणे' (६ । १ । १३७) इति । एवं सँस्कारा मानवानां भूषणानि तदुत्कर्षकाश्च भवन्ति । सँस्कारस्य पारिभाषिकलक्षणमपि भवति ।

**राजा-** किं तल्लक्षणं सँस्कारस्य महात्मन् ?

**ऋषिः-** अस्माकं तन्त्रवार्तिकनामके मीमांसाग्रन्थे लिखितमस्ति- योग्यतां चादधानाः क्रियाः सँस्कारा उच्यन्ते इति । अस्येदं तात्पर्यम्- सँस्कारा मानवेभ्यो योग्यतां ददति । इयञ्च योग्यता द्विप्रकारिका भवति पापमोचनतो जाता योग्यता नवीनगुणाधायकरूपा च योग्यता ।

**राजा-** अस्य विवरणं विशदनञ्च किं भवति ऋषे !

**ऋषिः-** कृतैः सँस्कारैर्जातकस्य कृते गुणानां प्राप्तिर्भवति, अथ च दोषाणां मार्जनं भवति ।

**राजा-** महात्मन् ! उदाहरणेन तथ्यमेतद् स्पष्टीकर्त्तुं शक्यते ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**ऋषिः-** यथा यस्य जातकस्य जातसँस्कारादि उपनयनादि च कृतं भवति स बालो वेदानध्येतुं शक्नोति, पौरोहित्यं कर्त्तुं शक्नोति, पाककर्म च कर्त्तुं शक्नोति। अथ च जातसँस्कारेण मातुः पितुश्च रजोवीर्यजदोषशुद्धिर्भवति, गर्भाशयस्य दोषाः परिमार्ज्यन्ते इति ते आवश्यका भवन्ति। अत एव शवरस्वामी लिखति शाबरभाष्ये- 'सँस्कारो नाम स भवति यस्मिन् कृते पदार्थो (जातकः)भवति योग्यः कस्यचिदर्थस्य' इति।

**राजा-** अस्माभिर्गौतममतं स्वीक्रियते, जातुकर्ण्यस्य व्यासस्य वा मतं स्वीक्रियते विद्वन् ?

**ऋषिः-** अस्माकं समाजे षोडश संस्काराणां प्रसिद्धिर्वर्त्तते परं गौतमनिर्दिष्टाश्चत्वारिंशत् संस्कारा अपि स्वीक्रियन्ते।

**राजा-** के ते षोडश सँस्कारा वर्त्तन्ते ऋषिवर ! ?

**ऋषिः-** ते च गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलकर्म, उपनयनम्, चत्वारि तस्य व्रतानि, गोदानम्, समावर्त्तनम्, विवाहः, अन्त्येष्टिश्च।

**राजा-** विवाहान्ताः सँस्कारा जीवितानां मानवानां भवन्ति मुक्तिहेतोः संसारहेतवे च, अन्त्येष्टिस्तु कथमावश्यकी भवति मृतानां महर्षे ! ?

**ऋषिः-** प्रेतत्वनिवृत्तयेऽन्त्येष्टिसँस्कारः क्रियते राजन्, अन्यथा मृतात्मा प्रेतः सन् स्वयं दुःख्येत स्वकीयाँश्च दुःखयेदिति तन्निवृत्तये अन्त्येष्टिरपि आवश्यकी भवति। सापि एकः सँस्कारश्चरमः। जातकस्य नामकरणसम्बन्धे च शास्त्रे विधानमस्ति 'दशम्युत्तरकालं पुरुषस्य जातस्य नाम विदध्यात्' इति। तेनैकादशे दिने जातस्य नामकरणं विधेयं भवतीति। जातकस्य नाम च घोषवदादि भवेत् अर्थात् हश्वर्णेषु कश्चन वर्णो नाम्न आदौ भवतु। अन्तःस्थवर्णाश्च यरलवरूपा नाम्नो मध्ये भवेयुः। राजन् ! तच्च नाम कृदन्तं भवेत् न तद्धितान्तमित्यपि नियमः।

**राजा-** ऋषे ! कृदन्तं नाम कीदृशं भवति ? तद्धितान्तञ्च कीदृशमिति।

**ऋषिः-** धातोर्घञादिप्रत्यये जातं पदं राम-कृष्ण-मोहनादि कृदन्तं भवति। तद्धितान्तञ्च सुबन्तात्तद्धितप्रत्ययेऽणिञादौ निष्पन्नं पदं भवति औपगव-दाक्षिरित्यादि। ऋषे ! तद्धितान्तं पदं नाम किमर्थं कर्त्तुं न शक्यते जातकस्य ?

**ऋषिः-** धर्मशास्त्रनिषिद्धत्वात् परम्परावैपरीत्याच्च।

**राजा-** महर्षे ! तद्धितान्तनामकरणे का हानिः ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**ऋषिः-** तद्धितान्तनामकरणे न केवलं पुण्याप्राप्तिरेव किन्तु पापावाप्तिरपीति दाक्षिः शालीय इत्यादि तद्धितान्तं नाम कस्यचनापि न कर्त्तव्यं भवति शास्त्राविहितत्वात् ।

**राजा-** ऋषे ! जातकस्य नामकरणस्य किमपि व्यावहारिकं फलमप्यस्ति ?

**ऋषिः-** अथ किम् ? व्यावर्त्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति कथितमेवास्ति शास्त्रकारैः । कस्यापि नाम तस्य लक्षणं भवति । लक्षणस्य नाम्नः प्रयोजनं व्यावृत्तिर्व्यवहारश्च भवतः । अन्येभ्यो नामवद्भ्यो व्यावृत्तिर्नामकरणस्यैकं फलम् । यथा- राम इति कस्यापि नामकरणे मोहनादेर्व्यावृत्तिर्भवति, स एव कार्येषु गृह्यते । व्यवहारश्च नामकरणस्यापरं फलम् ।

**राजा-** महात्मन् ! कोऽसौ व्यवहारः?

**ऋषिः-** अत्र व्यवहारश्च धार्मिके सङ्कल्पादौ नामग्रहणं जन्ममरणयोः पञ्जीकरणे तस्योल्लेखो भवति । शैक्षिके प्रमाणपत्रादौ च नामोल्लेखेन भाव्यं भवति चोल्लेखस्तस्येति जातकस्य नामकरणमावश्यकं भवति । तच्च धर्मशास्त्रानुसारेण जन्मन एकादशेऽहनि कर्त्तव्यं क्रियते च ।

**राजा-** महर्षे ! संस्कारसम्बन्धिनी मम जिज्ञासा शान्ता ।

**राज्ञी-** प्रकृतमनुसरामो राजन् ! जिज्ञासाशान्त्या विलम्बो जायते सँस्कारकर्मणि । (सँस्कारमन्त्रा गुञ्जन्ति, वाद्यध्वनिश्श्रूयते पक्षिणां कलरवोऽपि वन्यं वातावरणमाढ्यं करोति, जातादिसँस्काराः सम्पन्ना भवन्ति । नवजातस्य पुत्रस्य कृष्णागार इति नाम चाम्नातं वर्त्तते कृष्णायास्तटे जातत्वात्) । इति पटाक्षेपः ।

## पञ्चमोऽङ्कः

(नामकरणपर्यन्तान् सँस्कारान् विधाय राजदम्पती राजप्रासादं कृष्णागारेण पुण्यप्रसूनेन तपःफलेन च सह परावर्त्तितवन्तौ वर्त्तेते । राजदम्पतिभ्यां राजप्रासादीयैश्च दुर्लभं बालवात्सल्यं बाललालनसौख्यञ्चानुभूतम् । गच्छति काले स च कृष्णागारनामा बालकः शुक्लपक्षस्येन्दुरिव प्रत्यहं वर्धमानो द्रुतमेव चतुर्दशवर्षदेशीयः सञ्जातः ।

दैवदुर्विपाकात् कृष्णागारस्य माता मन्दाकिनी रुग्णतां गता । कृतेऽपि विविधे समुच्चोपचारे न स्वास्थ्यलाभं कृतवती । कतिपयमासानन्तरं चतुर्दशवर्षदेशीयं तपःप्रसूनं पुण्यफलञ्च कृष्णागारं त्यक्त्वा सा कालकवलायिता सञ्जाता । कृष्णागारस्य शमसारस्य च कृते दुर्दिनानि प्रारब्धानि । पत्न्या वियोगेन राजा शमसारो मातृवियोगेन



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च कृष्णागारो विक्षिप्ताविव सञ्जातौ। एवमेव दुःखसागरे निमग्नो राजा विक्षिप्त इव वर्षद्वयं व्यतियापयामास। तदनन्तरञ्च मन्त्रिणां प्रजानामन्येषां सुहृज्जनानाञ्चानुरोधेन पुनर्विवाहं कृतवान्, चित्रकूटस्य राज्ञो भुजकवचस्य कन्यया भुजावत्या सह। स तस्या नवोढाया बाहुपाशेन बद्धो भुजावत्या यौवनाङ्कुरैरन्यैर्हावभावैश्च विस्मृतमन्दाकिनीकः प्रकृतायितोऽभवत्। अयमेव विषयो नेपालगौरवमहाकाव्ये एवमुक्तः

कालक्रमेण नवयौवनयापि पत्न्या
पूर्वांश्च दुःखनिवहान् हि विनाश्य राजा।
सुस्थः प्रजाविनय-रक्षण-सम्भरादौ
लग्नश्च तासु भुवि रञ्जकतामियाय॥ इति।

**राजा-** (अमात्यान् सम्बोध्य) भो अमात्यशेखर ! कृष्णगारोऽयं प्रतिदिनं युवायते। अस्य सुरक्षार्थं भाविनीनां समस्यानां वारणार्थञ्चास्य कृते राजप्रासादस्यास्यालग्ने उपालये वसनस्याशनस्य च कृते व्यवस्थां कुरु। भोजन-शिक्षा-मनोरञ्जनादेर्न्यूनता न स्यादेतत्सम्बन्धीनीति।

राजाज्ञया कतिपयदिनानन्तरमेव कृष्णागारोऽयमपरस्मिन्नालये प्रासादपरिसरान्तर्गतेऽपि दूरस्थे निवस्तुं प्रारेभे। राजदम्पती चापरस्मिन् हर्म्ये वसतः स्म। एवं तयोः सापत्नमातृपुत्रयोरलग्नावासभोजनादिकारणतः परस्परमपरिचिताविव तौ बभूवतुः। अस्यां स्थितौ कतिपयमासानन्तरं राजा पत्नीं भुजावतीमाखेटाय गमनेच्छां व्यक्तवानेकदा)

**राजा-** भो महिषि ! राजकर्मणि व्यासक्तस्य मे मनोविनोदाय मृगयायै गमनेच्छा समुत्कटा सञ्जाता। त्वमत्र राज्ये तत्सञ्चालनं निरीक्षमाणा रमतां राज्यैश्वर्ये। न्यूनतोऽपि सप्ताहद्वयं तत्र लगिष्यति। तव सेविका दास्यः सन्त्येव। राज्यसत्तायास्तत्सञ्चालनस्य च अनुभवोऽपि त्वया समर्जितो भविष्यति। अतो मामादिश मृगयायै।

**राज्ञी-** नाथ ! नाहमेकाकिनी वस्तुं शक्नोमि। त्वया विना पर्यङ्कजातं गृहोपकरणञ्च भीकरं मम कृते स्यात्। नाहमेकाकिनी तत्र शयिष्ये। नायास्यति निद्रा मम नयनयोस्तत्र। अतोऽहमपि गमिष्यामि मृगयायै, सति नाथे त्वयि कथं वत्स्याम्येकाकिनी स्वपिष्यामि च।

**राजा-** नहि नहि राज्ञि ! मृगाः खलु घनघोरे उच्चावचभूमिके महारण्ये एव प्राप्स्यन्ते, तत्रैव च मृगया सम्भवति। तत्रोच्चावचभूमौ कूर्दनमुत्फालनञ्च कर्त्तुं त्वया न शक्ष्यते। एकत्र वसनेन च मृगा न



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राप्स्यन्ते न च मारयिष्यन्ते। त्वं हि हिण्डनेऽप्यसमर्था कथं कूर्दिष्यसे। मया सह तव गमने मम मृगयापि न भविष्यति, ममाखेटो विफलिष्यत एव। अपरञ्च कारणमत्र तव वसनस्यास्ति राज्यसञ्चालननिरीक्षणम्। आवयोरभावे शत्रवोऽस्मद्राज्ये समाक्रमणमपि कर्त्तुं शक्ष्यन्ति। एवमेकस्य राजप्रतिनिधेरावश्यकता वर्वर्त्तीति त्वयात्रैव वस्तव्यम्। (एवं बोधने विमर्शे च राज्ञोऽनुरोधं स्वीकरोति राज्ञी, मृगयायै चानुमन्यते राजानम्)।

**राज्ञी-** गच्छतु राजन् ! मृगयायै यथातथं जीविष्याम्यहम्। सबलः ससेवकश्च भवान् गच्छतु मनोविनोदनाय। मम कृते एकं मृगशिशुयुगलं जीवदेव चञ्चलमानयेत् स्वामिन् ! द्विसप्ताहाधिकः समयस्तत्र न लगेदेव। तत्र सतर्केण भाव्यम्। व्याघ्रभल्लुकादीनां लुण्ठाकानाञ्च भवितुं शक्नोति समाक्रमणम्, तन्नैव स्यादिति सचेतेन भवता भाव्यम्।

**राजा-** एतद्विषयिणीं चिन्तां मा कुरु राज्ञि ! मया सह मृगयाविदश्चतुराः सैनिका अपि भविष्यन्ति कतिपये, शत्रुदमनार्थं हिंस्रकजन्तुनिरासार्थञ्च। अहं स्वयमपि मृगयाकुशलो हिंस्रकेभ्योऽपि रक्षितश्च भविष्यामीति तत्र चिन्ता नैव कर्त्तव्या भवत्या। मृगानहं मारयिष्यामि वन्याश्च व्याघ्रभल्लुकादयो मां नैव आक्रमिष्यन्ति।

**राज्ञी-** ततस्ततः किं भवति ?

**राजा-** अत्रास्वस्ता भव प्राणवल्लभे ! शीघ्रं त्वद्दर्शनार्थं त्वत्परिचर्यार्थं चागमिष्यामि। (इत्युक्त्वा तत्सौन्दर्यपीयूषं पीत्वा शमसारः सपाथेयः सबलश्च राजप्रासादात् प्रतस्थे। सार्धैकदिनानन्तरं मृगयावनं सम्प्राप्य मार्ग्यान् मृगान् अन्वेषयामास। वन्यानां दृश्यावलीनां दर्शनञ्च कुर्वता मृगमारणाभावञ्चानुभवता तेन सप्ताहो व्यतिक्रान्तः।) सर्वे निष्क्रान्ताः। पटाक्षेपः।

## षष्ठोऽङ्कः

राजप्रासादे च विविधभोज्योपयोगेन कार्यान्तराभावेन पुंयोगसौख्यसुरततृष्णया ज्ञातास्वादतया च नवयौवना नवोढा च राज्ञी पुरुषशौण्डं ध्यायन्ती दास्या सह कामचर्चाञ्च कुर्वती बभूव। सा राज्ञी भुजावती दास्या सह वार्त्तां लपन्ती वर्त्तते, सा समाह्वयति ताम्।

**राज्ञी-** भो दासि ! अत्रागच्छ।

**दासी-** भो राज्ञि ! एषा समागच्छामि।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**राज्ञी-** तवापि पतिः कार्यवशाद्बहिर्गतो वर्त्तते मम पतिस्तव राजा च मृगयायै गतवान् वर्त्तते इदानीम्। अस्यां स्थितौ तव ममापि चाकर्षणं निजपतौ वर्धितं वर्त्तते तयोरप्यावयोर्वर्धितं भवेत्। अत्र स्त्रीपुरुषयोः परस्परार्कषणं किंहेतुकं भवेज्जानासि ?

**दासी-** कठिनः प्रश्नः। पतिपत्न्योः परस्पराश्रयणात् विपरीतलिङ्गत्वाच्च भवेद्राज्ञि !

**राज्ञी-** किञ्चित् सत्यं तावककथनम्। चञ्चले दासि ! सृष्टिसञ्चालनार्थं स्त्रीपुरुषयोर्व्यवस्थाभूत्, भगवता तत्र विपरीतलिङ्गञ्च संयोजितम्। तत्प्रयोगेण आनन्दानुभूतिः सन्ततिप्राप्तिश्च भवति। एवमेकेन पथा फलद्वयस्य प्राप्तिर्जायते। यद्यपि स आनन्दः क्षणिकः सातिशयश्च मन्यते मोक्षेच्छुकैः। ते तु निरतिशयमानन्दं समभिलष्यन्ति।

**दासी-** राज्ञि ! कोऽसौ सातिशय आनन्दो निरतिशयश्च ? पामराहं नैव बोद्धुं समर्था साम्राज्ञि !।

**राज्ञी-** कामसुखं विषयानन्दो वा सातिशयानन्दो भवति, निरतिशयान्मोक्षाद् ब्रह्मानन्दाद्वा न्यूनत्वात् क्षणिकत्वाच्च तदानन्दस्य। कामसुखाद् विषयानन्दाद्वा स्थायित्वात् परमानन्दप्रदत्वाच्च मोक्षसुखं तदानन्दो वा निरतिशयानन्द इति बुध्यतां चञ्चले !।

**दासी-** सातिशयसुखमभीष्टवस्तुप्राप्त्या मिथुनयोः रतिक्रीडया च भवति निरतिशयन्तु एकाकिनि ब्रह्मध्यानात्तदनुभवाच्चेति सत्यं राज्ञि ?

**राज्ञी-** आम् सत्यं सेविके। सातिशयसुखसन्दर्भे इदमपि बोध्यं चञ्चले ! केचन जनाः परस्य शारीरिकं सौन्दर्यं भोक्तुमिच्छन्ति, केचन यौनसुखम्, केचन च विपरीतलिङ्गस्योभयं भोक्तुमिच्छन्ति। यौनसुखेच्छुका उभयसुखेच्छुकाश्च कामवशगाः, सौन्दर्यमात्रसुखेच्छुकाश्च उत्तमाः, नयनयोः रूपसौन्दर्यविषयत्वात्।

**दासी-** रूपसौन्दर्यमात्रस्य दर्शकानां यौनसुखस्यानिच्छुकानामस्ति किमप्युदाहरणं राज्ञि !।

**राज्ञी-** अस्ति कथन्न, आनन्दवृन्दावनचम्पूकाव्ये भगवतः कृष्णस्य सौन्दर्ये मुग्धा कस्यापि गृहस्थस्य पत्नी कथयति-

मां धवो यदि निहन्ति हन्यतां बान्धवो यदि जहाति हीयताम्।
साधवो यदि हसन्ति हस्यतां माधवः स्वयमुरीकृतो मया ॥
(८।३७) इति।

(अत्र विवाहिता पुत्रवती कृष्णतो वयसा ज्येष्ठा च गृहस्थस्य पत्नी कृष्णसौन्दर्ये समाकृष्टा तद्दृष्टुं सर्वं त्यक्त्वा गच्छति न यौनाकर्षणेन।)

**दासी-** सत्यम्। तर्हि यौनमात्राकृष्टा कथं परिचीयन्ते राज्ञि ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**राज्ञी-** ते यौनसुखमात्रमिच्छन्ति, योनिं विपरीतलिङ्गं वा प्रशंसन्ति तस्य चर्चाञ्च कुर्वन्ति । काव्यमीमांसायां राजशेखरः समुल्लिखति-

यस्याः प्रसन्नधवलं चक्षुः पर्यन्तपक्ष्मलम् ।
नवनीतोपमं तस्या भवति स्मरमन्दिरम् ॥ इति ।

एवं यौनाकर्षणं प्राणिमात्रस्य स्वभावस्तत्रापि ज्ञातास्वादस्य ज्ञातास्वादायाश्च कृते तु समधिकमाकर्षणम् । इदानीं वियुक्तावस्थायामेतत्तथ्यं त्वयाप्यनुभूतं भवेच्चञ्चले !

**दासी-** कामावेशः प्राणिमात्रे भवति । तेन मानवान् तत्र मर्यादितान् कर्तुं कापि व्यवस्था विहिता स्यात्, अन्यथा मत्स्यन्यायस्य प्रवृत्त्या मानवसमाज उच्छृङ्खलः स्यात् राज्ञि ॥

**राज्ञी-** अस्त्येव तादृशी व्यवस्था धर्मशास्त्रेषु । निजेन विवाहितायां निजया विवाहित एव च यौनसम्पर्को विधेय इति । अथ च व्याकरणमहाभाष्येऽपि साधुशब्दानामेव प्रयोगः कर्त्तव्यो नासाधुशब्दानामिति निर्दिष्टं वर्त्तते । तत्प्रसङ्गे उदाहरणरूपेणोक्तं महाभाष्यकृता- खेदात् (इन्द्रियनिग्रहासामर्थ्यात्) स्त्रीषु प्रवृत्तिर्भवति ।

**दासी-** संयम एव सर्वलाभसिद्धिः ।

**राज्ञी-** न तन्मम मतम् । समानश्च खेदविगमो गम्यायाञ्चागम्यायाञ्च । तत्र नियमः क्रियते विवाहकृता इयं गम्या तदभावेन चेयमगम्येति । एवं गम्या एव रतिक्रियार्थं गमनीयेति । एवमेव च- 'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः' इति च । सान्दर्भिकं कथनमत्र बोध्यं दासि ! एवञ्च अवैधयौनसम्बन्धो हेयस्तथापि मानवस्तेन समाकृष्यत एव ।

**दासी-** कामः खलु विशेषतो मानवानां कृते यादृच्छिकश्शास्त्रविहितो वा राज्ञि ?

**राज्ञी-** पशूनां कृते यादृच्छिको मानवानां कृते तु शास्त्रविहित एव । धर्मार्थकाममोक्षा हि पुरुषार्था उच्यन्ते शास्त्रेषु । अत्र पुरुषपदमात्मपरम् । पुरुषैः स्त्रीभिश्चार्थ्यन्ते चत्वारोऽपीमे इति ते स्त्रीपुरुषयोरेव पुरुषार्थाः । एवञ्च संसरतापि मानवेन धर्मोऽनुष्ठेयः, अर्थः समुपार्जनीयः, कामः पूरणीयः, मोक्षश्चाधिगन्तव्यः ।

**दासी-** पुरुषार्थचतुष्टयस्य धर्मार्थकाममोक्षरूपस्य प्रकृतक्रमिकत्वं सहेतुकं निर्हेतुकं वा राज्ञि ?

**राज्ञी-** सहेतुकं सेविके ! पूर्वं मानवेन दान-परोपकार-सेवा-यज्ञादिकर्मभिः पुण्यं समर्जनीयम् । ततो धर्माधीनोऽर्थः समर्जनीयस्ततश्च धर्माधीन एव कामः पूरणीयस्ततश्च मोक्षोपायं समर्ज्य मोक्षभाजा भाव्यं मानवेन ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**दासी-** राज्ञि ! भवत्या अर्थकामयोर्धर्माधीनता प्रोक्ता, किं तात्पर्यं तस्य, पामराहं नैव बुध्ये, विशदयितुं शक्यते भवत्या ?

**राज्ञी-** सेविके ! यथाज्ञानं विवृणोमि तत्तत्त्वम् । पुरुषार्थेषु धर्मार्थकाममोक्षेषु धर्मस्य प्राथमकित्वं नयनविषयत्वमेव । तच्च धर्मस्याभ्यर्हितत्वादत्यावश्यकत्वाच्च । अत्यावश्यकी च धर्मस्य पूर्वं स्थितिः । सा चार्थकामयोर्नियन्त्रकत्वेन स्वीकृता शास्त्रैश्शास्त्रकारैश्च । अत एव धर्मानुसारं देशस्य नियमविनियमानुसारञ्च अर्थोपार्जनं न्याय्यं न नियमविरुद्धं भ्रष्टाचारप्रयुक्तञ्चेति अत्र बोध्यम् ।

**दासी-** एवं तर्हि कामस्य धर्माधीनत्वं केन कारणेनावश्यकं राज्ञि ।

**राज्ञी-** एवमेव कामोऽपि धर्माधीन एव पुरुषार्थतां भजते न धर्मविरुद्धः । एवञ्च वैधेनोपायेन वस्तुविषयकः कामः पूरणीयोऽग्निसाक्षिक-धर्मशास्त्रानुसारिविवाहेन च विवोढायां कामरूपा रतिस्तर्पणीया न यस्यां कस्यामपि, यस्मिन् कस्मिन्नपि वा पुरुषे । परन्तु मानवमनः प्रमाथि बलवद् दृढञ्च वर्त्तते सेविके !! तस्य वशीकरणमशक्यम्, तच्च दुःशक्यम् ।

**दासी-** राज्ञि ! लोके कामोपभोग-मांसभक्षण-मद्यसेवनप्रसङ्गे वादो विवादः शास्त्रार्थश्च जायमाना लोके शास्त्रे च श्रूयन्ते । तत्र विषये मत्पितुर्मुखादयं भागवतश्लोको मया पौनःपुन्येन श्रुतः-

लोके व्यवायामिषमद्यसेवा
नित्यास्तु जन्तोर्न हि तत्र चोदना ।
व्यवस्थितिस्तासु विवाहयज्ञ
सुराग्रहैरासु निवृत्तिरिष्टा ॥(श्रीमद्भागवतम् ११/५/११) इति ।

**दासी-** सरलायां भाषायामस्य कोऽर्थः ?

**राज्ञी-** लोकेऽस्मिन् युवावस्थायां प्राणिमात्रस्य कामसेवा तदुपयोगो वा नित्यः, शिक्षणं विनापि ज्ञेयोऽनुभवनीयो व्यवहरणीयो वा भवति, आमिषसेवापि तथैव स्वादुत्वात् । मद्यसेवायामपि मनोरञ्जकत्वात् भावनायामुड्डयितुं शक्यत्वाच्च जनास्तत्र प्रवर्त्तन्ते इयं वस्तुस्थितिः । अत्र बहुशो विकृतिर्दृश्यते । अतो विकृतिनिरासार्थं विधिपूर्वकं विवाहितायां विवाहिते एव वा व्यवायस्तर्पणीयो रतिर्वा रसनीया नान्यत्र ।

**दासी-** ततस्ततः किम् राजमातः ?

एवं विधिपूर्वकं बलिप्रदानेनैव प्रसादरूपेण रुचिश्चेत् मांसं भक्षणीयं नान्यथा । एवमेव सौत्रामणियागादिविधानेन तत्प्रसादरूपेण मद्यं सेवनीयं नान्यथा । इयमशक्तानां जिह्वापरवशानां कृते व्यवस्था ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वस्तुतस्तु तेभ्यस्तत्त्वेभ्यो निवृत्तिरल्पप्रवृत्तिर्वा आवश्यकीति। परन्तु मनोमन्थकान्मन्मथादुदासीनता दुर्लभा सेविके। (इति सर्वे निष्क्रान्ताः)। पटाक्षेपः।

## सप्तमोऽङ्कः

(एकदा समवयस्कादिहेतोरपरस्मिन् प्रासादे वसन् हिण्डमानश्च सुन्दरो युवकः पुष्टश्च कामतृष्णावत्या जागृतमन्मथवत्या च राज्ञ्या भुजावत्या व्यलोकि। शास्त्रविदपि भुजावती अभ्यासेन सा दिनेषु बहुवारं तं द्रष्टुं प्रयतते स्म, तत्र सफला च भवति स्म। एकस्मिन् दिने प्रमदा सा राज्ञी दासीमादिशति तमानेतुम्)

**राज्ञी-** चपले दासि ! अत्रागच्छ, मम वार्त्तां शृणु- परत्र भवने यः इतस्ततो हिण्डमानो यातायातञ्च कुर्वन् को युवकः ? किमर्थमितस्ततश्चलति ? कश्चन गुप्तचरश्च नास्ति सः ? मद्वचनात् समाहूयात्रानय। तेन सहाहं वार्त्तां लपिष्यामि, पृच्छामि च तं किमर्थं प्रत्यहं प्रासादपरिसरे भ्रमतीति।

**दासी-** यथादिशति राज्ञि ! कोऽसौ वराको हतभाग्यश्चात्र राजप्रासादपरिसरे निश्शङ्कमितस्ततो भ्रमति। तं बलादप्यानयामि भवत्याः सकासम्। (निष्क्रामति ततो दासी- तं युवकं प्राप्य सा- भो युवक त्वां राज्ञी समाह्वयति-समागच्छ मया सह तां द्रष्टुमिति जगाद। कृष्णागारः- केनापि कारणेन सा सापत्नमाता समाह्वयतीति विचार्य स प्रश्नं विनैव दास्या सह राजभवनं प्राप्तवान्। ताञ्च सविनयं प्रणमति स्म।)

**दासी-** महाराज्ञि ! अयमेव महानुभावो भवनान्तरे इतस्ततो भ्रमणकर्त्ता। (इत्युदीर्य तं तत्र प्रापय्य राज्ञ्या प्रकोष्ठे यवनिकां प्रसार्य बहिर्गतवती दासी, कार्यान्तरेषु च संलग्ना बभूव।)

**राज्ञी-** भो युवक ! मत्समीपमागच्छ, मत्समीपस्थे आसने वस। (कृष्णागारश्च लज्जमानः किञ्चिदेव सन्निकटो भवति। ततश्च तया ततोऽपि सन्निधातुमादिष्टः सः। तथाकरणेऽपि ततोऽपि शरीरस्पर्शस्तया समीहितः। एवं तस्यास्तादृशं हावं भावञ्च दृष्ट्वा कृष्णागारो लज्जया विभीषिकया च दूरमपससार। युवकसम्पर्कं पूर्वत एव कामयमाना पूर्वतो ध्यायन्ती सा कामावेशेन बाहुलताभ्यां तमाबद्धुं समीहितवन्ती चेत्यवधार्य दूराद् दूरमपससार कृष्णः)

राज्ञ्या रतितृष्णां बुद्ध्वा ग्राम्यकर्मोन्मुखतामवधार्य च तां कृष्णागारः कविवचसा एवमाह-



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भो प्रार्थयित्रि ! तव नास्मि विलासनीयः
पुत्रोऽस्मि ते मम पितुर्विवहेन योगात् ।
त्वद्गर्धतो यदि भवेद्रमणं त्वया चेत्
राजा हनिष्यति क्रुधा द्वितयं विनिश्चयः ॥

अपरञ्चेदं श्लोकरूपवचनमुवाच कृष्णः-

लोके जना विधिविहीनशरीरयोगं
मात्रा स्वपुत्रविहितमपि पापहेतुम् ।
जन्मान्तरेऽपि मनुजा बहु गर्हयन्ति
ष्ठीवन्ति चापि नहि वेत्सि कथं विमातः ? ॥ इति च ।

अथ च तव गर्धपूरणाक्षमोऽहं गच्छामीति कथयन् कृष्णागारस्ततो निश्चक्राम ।

(ततश्च भुजावती कृष्णागारोक्तसम्बन्धकथनेन ज्ञाततथ्या निजवञ्चनामनुभवन्ती स्वस्या नीचकर्मणः प्रकाशनभिया कृष्णस्य सपत्नीपुत्रतया च मृगयातो राजाऽऽगमनसमयमवधार्य च विषं भक्षयित्वा रज्जुलम्बनं वा विधाय प्राणान् जिहासुरभवत्सा । ततश्चतुरा दासी तस्यास्तत्र प्रवृत्तिं निरुध्य तदपराधगोपनोपायान् जगाद) ।

**दासी-** राज्ञि ! केशान् शिथिलीकृत्य वस्त्राणि विपर्यस्य रुदन्त्यास्तव कोपभवने शयनमुचितमिति । (सा च तथैव कुर्वाणा समभूत् । सा च केशान् शिथिलीकृत्य हस्तौ पादौ च प्रफाल्य विपर्यस्तवस्त्रा रोदनमभिनयन्ती भुजावती बभूव । (तत्रैवावसरे राजा शमसारो मृगयातः समागतवान् । श्रान्तः क्लान्तोऽपि राजा ज्ञातभुजावतीवृत्तान्तो राज्ञीमुपतिष्ठते पश्यति च तथा स्थितां ताम् । सम्बोधयति च तां राज्ञीम् ।)

**राजा-** भो राज्ञि ! किमिदं करोषि, केन पाप्मना ईदृशीमवस्थां प्रापितासि त्वम् ? केनापि तवोपरि कुदृष्टिः पातिता किम् ? तस्य यस्य कस्यापि लोचने लुञ्चामि, जिह्वामुत्पाटयामि हस्तौ छिनद्मि । केनापि मृत्यून्मुखेन त्वं स्पृष्टा निन्दिता वा ? तस्य चरणद्वयमपि भनज्मि । (ततश्च तेन राज्ञा इदं क्रोधोद्भावकं वचनं कविवचसा जुघुषे) -

प्रत्यग्रपुष्पमिव कोमलकायधाम्नि
केनापि दूषणततिर्विहिता नु दण्ड्या ।
किं वा तवाचरणकर्मकनिन्दनञ्च
कृत्वापराधबहुलं कृतवान् गतायुः ॥ इति



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(एवं राज्ञा समादृता निजसान्त्वनारूपं स्वाभीष्टं विरोधिभेदनं स्वसमर्थकञ्च राजवचनं श्रुत्वा आस्वस्ता सा भुजावती रोदनमभिनयन्ती)-

**राज्ञी-** स्वामिन् ! तव मृगयार्थं गमनानन्तरमेव कृष्णोऽयं तव पिण्डदो मां कदर्थयति, अनाहूतोऽप्यागत्य मामुपहसति नीचाचरणमश्लीलाचरणञ्च नित्यं करोति। निषिद्धोऽपि दुष्टभावेन अभद्राचरणेन च रहसि समागत्य मां स्पृशति आलिङ्गितुमिच्छति च। ग्राम्यां कामवार्तां निषिद्धामपि पौनःपुन्येन प्रलपति। निषेधन्तीमपि मां हस्ताकर्षेण नैच्यं प्रदर्शयति सः। तद्भीतितः सकलमपि सौविध्यं सुन्दराणि वस्त्राणि आभूषणानि च प्रफाल्य चरित्ररक्षार्थं पिहितद्वाराहमात्मानं यथातथं गोपयामि। अनेन च कविवचसा किञ्चित् वच्मि।

श्रृणु- कृष्णस्य कृष्णचरितस्य बकायितस्य
स्वामिन् त्वदीयविरहावसरस्य काङ्क्षणः।
दुष्कर्म तद् भवति मर्मणि घातकं मे
तत्रास्ति साक्ष्यमिह तथ्यवचास्तु दासी ॥ इति

**राजा-** (प्रमदाया निजप्रेयस्या छद्मवचनानि सत्यानि मत्वा पक्षान्तरस्यान्वेषणं विवेचनाञ्चापहाय तथाकथितस्य अपराधिनोऽपूर्वं दण्डं जुघोष) अपराधिनो मम पुत्रस्यापि कूर्परादधो हस्तौ जानुतोऽधो पादौ च विच्छिद्य प्राणान् जिहासुः स चतुष्पथे हातव्यः, अयमेवाक्षम्याचरणस्य दण्डः। (एवञ्च राजाज्ञया कृष्णागारस्य हस्तयोः कूर्परादधश्चरणयोश्च जानुतो विच्छिद्य चतुष्पथे रक्षिभिः त्यक्तः। मूर्च्छाङ्गतो राजपुत्रः गोरक्षेश्वरमेव रक्षकत्वेनात्रं स्मृतवान्)। पटाक्षेपः। सर्वे निष्क्रान्ताः।

## अष्टमोऽङ्कः

(कृत्तचरणश्चतुष्पथे त्यक्तश्च कृष्णागारो राजदण्डभीतितोऽप्राप्तनागरिकसाहाय्यश्चित्करोति उच्चैः। हस्तपादच्छेदनपीडया कम्पमानोऽक्षिभ्यामेव कृतयाचनश्च शारीरव्यापारमात्रं करोति। ततो दैवयोगात् तस्य कृष्णागारस्य निरपराधत्वं योगबलेन जानानौ धृतत्रिशूलस्यूतकौ समुपतिष्ठतो मत्स्येन्द्रनाथगोरखनाथौ चतुष्पथे तत्रत्ये। तत्र गुरुत्वेनात्रान्याय्ये विषये प्रथमं वक्ति, दयार्द्रः सन् गोरखनाथं कर्त्तव्यं निर्दिशति च मत्स्येन्द्रनाथः)।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**मत्स्येन्द्रनाथः-** असहायो हतभाग्योऽसौ कृष्णागारो मरणासन्नश्च चतुष्पथे चित्करोति। तमसहायमन्यायपीडितञ्च प्रति दयां कुरु। तं पीडाग्रस्तमसह्यंवेदनं वक्तुमप्यसमर्थं तपोलब्धं राजकुमारं स्नेहेन दयया च शरीरे तद्गतक्षतेषु च स्पृशन् समन्त्रं भस्मलेपनं कृत्वा जीवय तं सिद्धिराट् !! तव स्पर्शेन प्रसादेन च क्षणादेव गतपीडः सन् सन्धातकरचरणश्च सुखं शयिष्यते समुत्थाय वत्स्यति च। भविष्ये च स महामानवः सम्भवेदिति।

**गोरखनाथः-** गुरवो यदुपदिशन्ति तत् सम्पादयाम्यहम्। राजकुमारोऽयं महामानवो भविता चेत् तद् गर्वस्य विषयो भविष्यति। धूर्जटितः प्राप्तं ज्ञानमयं हठयोगं सिद्धिविज्ञानं शाबरतन्त्रं दर्शनञ्च स प्रकाशयिष्यति।

**मत्स्येन्द्रनाथः-** सिद्धगोरख ! गच्छ तं पीडितं राजकुमारं जीवय पूर्वम्।

**गोरखनाथः-** गुरुभिरपि गन्तव्यम्। वार्त्तां कुर्वन्तौ शनैश्शनैस्तत्र गच्छावः। यत् कर्त्तव्यं भवति तदाचरणीयमेव मया। (ततः कृष्णागारसमीपं प्राप्नुतस्तौ)।

**कृष्णगारः-** (कम्पमानेन शिरसा प्रणमति, अश्रूणि मुञ्चति, मां जीवय इति भावं सम्प्रेषयति)। एषोऽन्यायपीडितोऽकिञ्चन च भवन्तौ नौमि। मृत्युमुखान्मां जीवयताम्। सति जीविते भवदीयां सेवाङ् करिष्यामि कृतज्ञताञ्च समर्पयिष्यामि।

**गोरखनाथः-** तवोज्जीवनाय शोचमानं मां गुरवोऽप्यादिशन्ति त्वद्धिताय, कातरो मा भूः। पूर्वं जीवितव्यं त्वया। जीवितेन च त्वया राजप्रासादो गन्तव्यस्तत्र त्वत्पिता दर्शनीयश्च।

(ततः गुरुगोरखः स्वस्कन्धे लम्बितात् झोलापदवाच्यात् स्यूतात् भस्मानि समुद्धृत्य मन्त्रपूर्वकं क्षतेषु लिम्पति, तत्र स्पृशति च। ततः क्षणादेव हस्तौ पादौ च सँल्लग्नौ भूत्वा यथापूर्वं सञ्जातौ। ततः स पीडितः कृष्णागारस्तौ प्रणमति कृतज्ञताञ्च प्रकटयति। तं सञ्जातहस्तचरणं गोरखनाथो राजप्रासादं गन्तुमादिशति। अस्यां स्थितौ स वक्ति)

**कृष्णागारः-** राजप्रासादस्य कृते मत्पितुश्च कृतेऽहं मृत एव। मारयित्वैवाहं चतुष्पथे त्यक्तः। मत्साहाय्यार्थिनोऽपि राजाज्ञया निषिद्धास्तत् कथमहं तत्र गत्वा जीविकामर्थये। मृत्वाप्यहं तत्र न गच्छामि, वरमत्रैव म्रिये। भवन्तो ममोज्जीवका इति भवत एवानुगच्छाम्यहमिति निर्णयं श्रावितवान्।

(ततश्च गुरुभ्यां राज्ञः शमसारतोऽनुज्ञां याचयित्वा तमनुगन्तुमादिदेश)



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**गोरखनाथः-** यद्यस्माभिरेव गन्तुमिच्छसि राजप्रासादं परावर्त्तयितुं नेच्छसि तर्हि वयं यादृशाः स्मस्तादृशेन त्वयापि भाव्यम्। वयं संन्यासिनः परिव्राजकाश्चेति त्वयापि तादृशेन भाव्यम्। मद्गुरुरप्यादिशति त्वद्धिताय। तदनुसारं त्वं हठयोगस्य नाथसम्प्रदाये दीक्षितो भव। एवं कृत एव अस्मत्साहचर्यं तवानुकूलमस्मदनुकूलञ्च भविष्यति। संन्यासिजीवनं कष्टकरं भवति। तत्र स्वीकृतिस्तव स्यात् तदैव अस्मत्साहचर्यं तवाप्यनुकूलं स्यात्। तत्र संन्यसिनां नियमानां पालने प्रतिबद्धो भव।

**कृष्णागारः-** योगिनां संन्यासिनाञ्च नियमपालनार्थमहं प्रतिजाने। गुरूणामाज्ञा मत्कृते चानुल्लङ्घनीया भविष्यति।

**गोरखनाथः-** तव प्रतिज्ञा सफला दृढा च भवतु। तर्हि त्वां गुरोराज्ञया गोरक्षदीक्षामन्त्रं श्रावयितुमुपक्रमे (ततो वेदिकां रचयित्वा तत्र सम्प्रदायानुसारं पूजयित्वा कृष्णगारस्य दक्षिणकर्णे दीक्षामन्त्रं श्रावयति।) तं कथयति च-

**गोरखनाथः-** त्वं चतुष्पथेऽस्माभिः प्राप्त इति तव साम्प्रदायिकं नाम चतुरङ्गी इति भवति। इतः परं त्वं चतुरङ्गी इत्यनेनैव नाम्ना समभिधास्यसे। (ततश्च तस्मै गैरिकवस्त्राणि कमण्डलुप्रभृतीनि योगिसाधनानि प्रदायैापचारिकं संन्यासिनं कारयति)।

**चौरङ्गिनाथः-** गुरुभिरहमनुगृहीतः। पूर्वमहं सापत्नमातुर्मिथ्यावचनानि विश्वस्य मम कथनमश्रुत्वैव पित्रा राज्ञाहं हस्तौ पादौ विच्छिद्य त्यक्तश्चतुष्पथे। तत्रापि नागरिकसहयोगोऽपि दार्ढ्येन निषिद्धः। तादृशायां स्थितौ मृतप्रायं मां जीवितं विधाय हस्तौ पादौ च यथावत् कृतौ भवद्भ्याम्। अथ च मम भावनां विदित्वा मां शिष्यत्वेनाङ्गीकृत इति तदर्थं भवद्भ्यो धन्यवादान् वितीर्य कृतज्ञतां ज्ञापये। भो गुरो ! भवतामहं शिष्य इति सर्वं भावत्कं सेवाकैकर्यं करोम्यहम्। इतः परं भवन्तः स्नानमात्रं कुर्वन्तु कटिवस्त्रं कौपीनञ्चाहं प्रक्षालयामि, शुष्केषु चोत्थापयामि, पूजाध्यानादिमात्रं भवन्तः कुर्वन्तु पूजासामग्रीः शुद्धासनरचनादिकञ्चाहं करोमि इतः परम्।

**गोरखनाथः-** शिष्यानुकूलं कथितं त्वया चौरङ्गिन् ! गुरुसेवया विद्या सिद्धिश्चागमिष्यति विनीतेषु शिष्येषु।

**चौरङ्गिनाथः-** आम् शिष्यैरीदृशैरेव भाव्यम्। अहञ्च गुरोरनुशासने स्थित्वा हठयोगं सम्पादयिष्यामि। कृष्णागारे चौरङ्गिनि सति तस्य गुरुसेवादिकमेवं वर्णितं कविना-



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मत्स्येन्द्रगोरखगुरू अनुयन् विरक्तः शुश्रूसु-सेवक-सुशिष्यतयानुव्राजकः।

प्रक्षाल्य गौरवपटानि सुपीड्य पादौ भिक्षां प्रयाच्य वचनानि विधाय सोऽभात्॥

शय्यासनादिरचनासु स बालकोऽपि प्रासादतः सपदि चागतवान् कुमारः।

पूर्वं गुरोर्गुरुकृते विरचय्य शय्यां श्रीगोरखस्य कृतवान् शयनञ्च सेवाम्॥ इति।

**मत्स्येन्द्रनाथः-** भो नवयोगिन्! त्वं राजकुमारोऽपि सँस्कारवान् विनीतश्चासि गुरुमर्यादां जानासि। इदं हि तव प्रकृतिदत्तं वैशिष्ट्यम्। अस्माभिर्ज्ञातं तव पिता शमसारो न शमं सारयति-प्रापयतीत्यर्थकः किन्तु शमं सारयति- लोपयति यः सः। पत्न्यास्तारुण्यव्यामोहेन तन्मात्रोपासकोऽन्धः। निरपराधस्य तवापराधस्य परीक्षणं विनैव त्वयि कठोरदण्डदायकः। सोऽपि दण्डितो भविष्यति भविष्यति। एतादृशा अन्येऽप्यपरीक्ष्यकारिणः समयेन दण्डिता भविष्यन्ति। अयं प्राकृतिको नियमः। एतादृशा अपरीक्ष्यकारिणः पश्चात्तपिष्यन्ति च तव पितेव।

**गोरखनाथः-** गुरवो यदाज्ञापयन्ति सत्यमेव तत्। पिता तु पितैव भवति रक्षकः संपरीक्ष्यकारकश्च न तु तव पितेव।

**मत्स्येन्द्रनाथः-** थुक्करिष्यन्ति जनास्तं तादृशश्च जनान्। शिश्नोदरपरायणाँश्च कथयिष्यन्ति तादृशान्। दैवात्तवावसरोऽयं ज्ञानप्राप्तेस्तत्प्रसारणस्य संन्यासग्रहणस्य च। भाग्येनैतल्लभ्यते। मानवजीवनमङ्कगणितवद् भवति। तत्र जीवन् जनोत्तमेन सुजनानां महात्मनाञ्च योगो वर्धनीयः संयोजनीयश्च दुर्व्यसनहेतुरीर्ष्यादिरपासनीयः स्वल्पयितव्यो वा। विदुषां सज्जनानां वा सङ्गतीनां गुणनं वर्धनं वा विधेयम्। परार्त्तयो विभजनीयाश्च। अत एव हि इदं कविवचनं सङ्गच्छते-

संख्यानवद् भवति वत्स! जनस्य जीवनम्,
तस्योन्नतौ बुधवरैर्युतिता विधेया।
ईर्ष्या च दुर्व्यसनहेतुरपासनीया,
संवर्धयेद् बुधगतिं विभजेत् परार्त्तिम्॥ इति।

**चौरङ्गिनाथः-** परमगुरो! सम्भवत्येतन्मम जीवने? यदि स्यान्ममैतद् भाग्यमेवैतन्मन्येत।

**मत्स्येन्द्रनाथः-** कथन्न सम्भविष्यति? अभ्यासः करणीयः प्रत्यहमाचरणीयञ्च। परिश्रमेण सत्कार्यस्याभ्यासेन च सर्वं सुसम्भवं भवति।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(एवमुपदेशान् परमगुरोश्श्रावं श्रावं तत्पादपीडनं करोति स्म चौरङ्गी। ततश्च स्वगुरोर्गोरखनाथस्य पादपीडनं करोति तथैव तदुपदेशाँश्च शृणोति प्रत्यहम्।)

**गोरखनाथः-** भो नवयोगिन्! त्वया सदैव स्वकर्माचरणं विधेयम्। स्वकर्मशील एव जन ऐश्वर्यं भजते, निष्क्रियश्च जनो दरिद्रताम्। अत एव 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा' इत्युपनिषद्वचनम्। साधुजनेन च जनसंग्राहकेण भाव्यम्। एकशिरा राम एव जनानां संग्राहकोऽभूत् पूज्यश्च, न दशशिरस्को रावण इति सर्वैरवधेयम्।

**चौरङ्गिनाथः-** आज्ञां भवदीयामनुपालयामि गुरो !, अन्यानप्यमृतायितानुपदेशान् शुश्रूषामि।

**गोरखनाथः-** पुराणेषु आत्मनः प्रतिकूलानि परेषां न समाचरेदिति हि शिक्षा वर्त्तते। तत्पालनं त्वया अन्यैश्च कर्त्तव्यम्। केनापि तुभ्यं गालिदाने त्वं दुःखितो भवसि चेत्त्वयापि न कस्मैचनापि गालिर्देया। परस्य कारणादन्नाद्यभावेन बुभुक्षायां सत्यां त्वं दुःखमनुभवसि चेदन्यानपि बुभुक्षया पीडितान् मा कुरु त्वम्। केनापि त्वयि ताडिते पीडामनुभवसि चेत् त्वयापि कश्चन नैव पीड्यः। त्वदीये योगिमार्गे केनापि निन्दिते त्वं दुःख्यसि चेत्त्वयापि सम्प्रदायान्तराणि नैव निन्दनीयानि। इमानि खलु बोध्यानि विषयवस्तूनि कविवचसा एवमुच्यते-

निन्दासु गालिषु परेण कृतासु चेत्त्वम्,
दुःखानि साध्वनुभवन् विकृतिं प्रयासि।
तेनैव नान्यजनतासु विनिन्दनादिका,
त्वत्कर्तृकापि हि कदापि भवेद् विगर्हिता॥ इति
अन्नाद्यभावविहितेन च खिद्यसे त्वम्,
तेनेतरोऽपि भवतीति क्षुधा न पीड्यः।
तद्वच्च ताडनविधावपि वेदनीयं
कार्यं परस्य हितकारि निजानुरूपम्॥

अपरञ्च हे नवयोगिन्! त्वया स्वीकृतसंन्यासेन स्वार्थतृष्णादिविषयविषजालं तिरस्कृतं भविष्यति भाविनि।

**चतुरङ्गी-** पालनीयाः खलूपदेशा गुरूणाम्, उपदेशान् श्रुत्वा मे मनः प्रसीदति, हर्षो वर्धते, मनसि शान्तिरायाति च। गुरोरुपदेशानुसारेण भोगादिविषयविषजालं परास्य गोरखविद्यायाः प्रचाराय प्रसाराय जनोद्धाराय च प्रयतिष्ये ममोज्जीवकगुरो !!

**गोरखनाथः-** विषयतृष्णाया दूरीकरणेन समाजस्य राष्ट्रस्य च हितमाचरणीयम्। सनातनस्य धर्मस्य योगपरम्पराया



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नटराजप्रसूतायाः संरक्षणं विधेयम्। कर्णवेधपरम्परा चाक्षुण्णा विधेया। रोटिकार्पणपरम्परा सञ्चालनीया सुरक्षणीया च। शाबरतन्त्रं विशदनीयं प्रचारणीयञ्च। तत्तज्जनभाषायामपि तत् प्रचारणीयम्। जीवेश्वरयोर्द्वैतता विशदनीया।

**चौरङ्गिनाथः-** ततस्ततः किं गुरुदेव ?

**गोरखनाथः-** नटराजात् प्रसूतो हठयोगो मुक्तिदः स्वास्थ्यदश्च प्रचारणीयः। मनो वशीकृत्य तच्छक्तिमन्तर्मुखीं विधाय सूक्ष्मस्य शरीरस्य चित्तवृत्तिमाध्यमेन परमात्मनः साक्षात्करणमेव तु हठयोगः। स्यूतं वस्त्रञ्च नैव परिधानीयम्। निरन्तरं श्रमं कृत्वा कारयित्वा च जनानां देशस्य च परावलम्बनता अपाकरणीया।

**चौरङ्गिनाथः-** उपदेशान्तरमन्यन्मे स्याद् गुरो !।

**गोरखनाथः-** संन्यासिनस्तव विशेषेण परब्रह्म एव ध्येयं स्यात् युतिषु नीतिषु चादर्शता विवर्धनीया। नाथमार्गो विशदनीयः। त्वयि चास्य वैशिष्ट्यप्रदर्शके सम्प्रदायाचार्योऽपि भविष्यसि परं तत्राधिकस्य तपस आवश्यकता त्वयि समपेक्ष्यते।

(नाथसम्प्रदायस्य स्तोत्ररत्नानि सवाद्यं गुञ्जन्ति। प्रकाशस्य विविधा स्थितिर्दृश्यते। मत्स्येन्द्रनाथगोरक्षनाथौ अभयमुद्रायां चतुरङ्गिनाथश्चाभिवादनमुद्रायां दृश्यन्ते। सर्वे निष्क्रान्ताः। पटाक्षेपो भवति।

## नवमोऽङ्कः

(शमसारदम्पतिभ्यां दुष्करेण तपसा प्राप्तः पुत्रः कृष्णागार इदानीं चौरङ्गिनाथो वर्त्तते राज्ञः शमसारस्य प्रेयस्यन्धतया। हस्तौ पादौ विच्छिद्य चतुष्पथे त्यक्तं कृष्णागारं स्वगुरोरादेशेन स्वस्य परपीडाकातरतया च गोरखनाथः समुज्जीवितवान् तम्। न जीवनमात्रं दत्तं तस्मै, छिन्नौ हस्तपादौ च तस्य सन्धापितौ। एवं राजप्रासादतो वितृष्णः संन्यासं प्रति सतृष्णश्च स चौरङ्गी मत्स्येन्द्रनाथ-गोरखनाथौ समनुगच्छति। तयोश्शिष्यताञ्च स्वीकरोति। अत एव तस्य साम्प्रदायिकं नाम चौरङ्गिनाथ इत्यभूत्। स समाजसेवां सिद्धिं नाथसम्प्रदायं प्रति च उत्कटेच्छावान् वर्त्तते। अत एव स उक्तां विशेषतां समर्जयितुं तावनुगच्छति। तत्र च सिद्धीनां प्राप्तये कठिनस्य तपस आवश्यकता वर्त्तते इति तौ बोधयतस्तम्। कठिने तपसि च स उत्साहवान् जिज्ञासुश्चाभूच्चौरङ्गी। तत्र च भ्रमणसन्दर्भे तपसे समुद्यतस्य चौरङ्गिणः कृते तपोयोग्यं स्थलञ्च परीक्षमाणा वर्त्तन्ते गुरवः।)

**चौरङ्गिनाथः-** (श्रान्तः क्लान्तश्च सन्) कुत्र समागता वयं कुत्र गच्छन्तश्च स्मः गुरवः?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**मत्स्येन्द्रनाथः-** (चौरङ्गिनाथस्य भावनां स्थितिञ्च बुद्ध्वा)भो नवयोगिन् ! तव पित्रोस्तपःस्थलं कृष्णातटमेवेदं वर्त्तते। इदं तदेव स्थलं वर्त्तते प्रकृत्या चारु। अत्र तपस्याया अत्यनुकूला गुहा वर्त्तन्ते। शान्तं धार्मिकञ्च स्थलमस्ति। त्वमपि श्रान्तः क्लान्तश्च दृश्यसे। अतोऽत्र चत्वरे विश्रामं कुर्मः।

**चौरङ्गिनाथः-** मम भावनां स्थितिञ्च जानन्ति परमगुरवः। इतो नातिदूरे स्रोतसि शीतं जलं वर्त्तते आनयामि कमण्डलौ। (क्षणानन्तरम्। गत्वा जलमानयति। आनीतं जलं पूर्वं परमगुरवे समर्पयति, ततश्च स्वगुरुं ददाति।)

**गोरखनाथः-** (इतस्ततः कुर्वन्) अतिशीतलं मिष्टञ्च जलम्।

**मत्स्येन्द्रनाथः-** स्वादे शैत्ये च प्राकृतिकता अत्रत्ये जले प्राप्यते। अत एव चात्र तपस्या सम्भवति। अत्र वन्यानि फलान्यपि मधुराणि सन्ति। तत्र परत्र पक्वानि आम्रफलानि दृश्यन्ते। (चौरङ्गी गत्वा तानि त्रोटयित्वा आनयति, सर्वे खादन्ति प्रशंसन्ति च।)

**चौरङ्गिनाथः-** गुरवः परमसिद्धिप्राप्तिः कठिनात् तपस एव भवतीति भवन्तो कथयन्ति। किं नाम कठिनतपस्त्वम् ? किं तस्य लक्षणं भवति?

**मत्स्येन्द्रनाथः-** वत्स ! तपो विषये मनुरेव ब्रवीति-

यद् दुष्करं यद् दुरापं यदुर्गं यच्च दुस्तरम्। तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्॥ इति।

अयमस्यार्थः- भगीरथस्य गङ्गानयनम्, पार्वत्या वरत्वेन शिवस्य प्राप्तिः, ध्रुवस्य ध्रुवलोकप्राप्तिः, मार्कण्डेयस्य मृत्योः सन्तरणञ्च तपसो दुर्लभं फलम्। एवं त्वयापि दुर्लभं फलम् असाधारण्यौ सिद्धिः प्रसिद्धिश्चेष्यते चेत् तादृशं तपस्त्वया करणीयमेव।

**चौरङ्गिनाथः-** (तपो विषये अन्यज्जिज्ञासते) भो परमगुरो ! तपसा साधितानि अन्यान्यपि फलानि पुराणेषु प्राप्यन्ते ? तादृशं तपः कर्तुं तापसस्य कृते समयावधिरपि निर्धारितो वर्त्तते ?।

**मत्स्येन्द्रनाथः-** पूर्वन्तु लघोः प्रश्नस्योत्तरं देयमवधिसम्बन्धिनः। सामान्यतया असाधारणफलप्राप्तयेऽसाधारणस्य तपसः कृते द्वादशानि वर्षाणि निर्धारितानि सन्ति। निर्विघ्नतया नियमेन क्षुधां तृष्णाञ्च विजित्य तपसि समनुष्ठिते साफल्यं हस्तगतं भवति तत्रावधौ।

**चौरङ्गिनाथः-** अन्यानि कीदृशानि सन्ति तपःफलानि परमगुरो ! (मत्स्येन्द्रनाथः प्रश्नानामुत्तराणि दातुं गोरखनाथं सङ्केतयति)

**गोरखनाथः-** भो नवयोगिन् ! त्वयापि श्रुतं भवेत् वायुजेन हनुमता तपस्यावलादेव सुरसाया मुखतो निवृत्तिर्लब्धा, सिद्धाः पादत्राणाभ्यां तटिनीं तरन्ति, हनुमानेव सिद्ध्या अणुतां प्रयुज्य लङ्कां तत्र स्थितां



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सीताञ्चाधिगतवान्, बालकृष्णः सिद्धया एव गुरुतामाधृत्य वातासुरं पातितवान्, अनुभववृद्धये शङ्कराचार्यप्रभृतिभिः परकीयशरीरं प्रविश्यार्जितेनानुभवेन भारती जिता एव। भगवता बुद्धेन अनेकानि शरीराणि धृत्वा कर्मफलनाशनं विहितमेव। सौभरिनामा ऋषिः स्वेन विवाहितासु पञ्चाशत्पत्नीषु एकस्मिन्नेव समये रमते स्म। तद्रमणं तपःसाध्यया सिद्धयैव। एवमनेकान्युदाहरणानि योगसिद्धेः।

**चौरङ्गिनाथः-** तपोजातायाः सिद्धेः प्रकारा अन्येऽपि भवन्ति गुरो ! यज्ज्ञात्वा ममातुरता दृढता च तपसि वृद्धिं यायात् ?

**गोरखनाथः-** सन्ति कथन्न। सामान्यतया सिद्धयः पञ्चधाः पातञ्जले योगदर्शने प्रदर्शिता वर्त्तन्ते। ते च जन्मजाः, ओषधिजाः, मन्त्रजाः, तपोजाः, समाधिजाश्च भवन्ति। त्वया तपोजा समाधिजा वा समर्जनीया सिद्धिः।

**चौरङ्गिनाथः-** मम रुचिः समाधौ तत्रापि तज्जातायां सिद्धाविति तद्विषये गुरुणा स्फीतिर्विधेया भो गुरो !!

**गोरखनाथः-** सामान्यतया समाधिजास्तपोजा वा सिद्धयोऽष्टप्रकारिका भवन्ति। ताश्च - अणिमा महिमा चैव गरिमा लघिमा तथा।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वञ्चाष्टसिद्धयः॥ इति।

**चौरङ्गिनाथः-** बालोऽहं सिद्धिविषये। अत एतद्विषये विशदनमिच्छामि गुरुभिः।

**गोरखनाथः-** अणिमा नाम अणुसमानभवनम् अदृश्यभवनं वा। यथा- हनुमान् अणुर्भूत्वा सुरसास्यतो बहिरागतवान् लङ्कां प्रविष्टवाँश्च। लघिमा नाम लघुर्भूत्वा भारमल्पीकृत्य वा उपरिगमनम्। यथा- वातासुरेण भगवतः कृष्णस्योपरिनयने स कृष्णो लघुरभवत् सरलतया बाह्यश्च परन्तु आकाशे अत्युपरिगते गुरुभूतो वातासुरं पातितवाँश्च सः। इदं महिमनामिकाया सिद्धेश्चोदाहरणम्। महिमा नाम पर्वतवत् गुरूभवनम्। प्राप्तिश्च क्वापि कुतोऽपि च कस्यापि वस्तुनः प्राप्तिर्भवति.।

**चौरङ्गिनाथः-** ततस्ततः किं गुरुदेव ?

**गोखनाथः-** प्राकाम्यं नाम सिद्धस्येच्छाशक्तेरबाधितत्वम्। एतादृशसिद्धिमान् इच्छितं वस्तु कुत्रापि कस्मिन्नपि समये किमपि प्राप्तुं शक्नोति। इयं सङ्कल्पसिद्धिरपि भणितुं शक्यते। ईशित्वञ्च सर्वपदार्थेषु अधिकारसाधिका सिद्धिः। अनया सिद्धया कुड्यादिकमपि स्ववाहनं विधातुं शक्यते। वशित्वं नाम सर्वेषां प्राणिनां सिद्धेन सिद्धिद्वारा स्ववशीकरणम्। एवमात्मप्रसिद्धये जनोपकाराय च



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिद्धिरत्यावश्यकी संन्यासिनां कृते। त्वमपि संसाराद्विरक्त इति जनकल्याणाय आत्मप्रसिद्धये च सा अत्यावश्यकी एव त्वदर्थम्।

**चौरङ्गिनाथः-** सिद्धेः परिचयस्तन्महत्त्वञ्च सञ्जातं मयि भो गुरो !! अहं तादृशीं सिद्धिं प्राप्तुमिच्छामि। तदर्थं मार्गानुपायाँश्च निर्दिश।

**गोरखनाथः-** संन्यासिनां कृते सिद्धिरत्यावश्यकी वर्त्तते परं तद्वशित्वन्तु नावश्यकम्। तद्वशित्वे संन्यासिनां पातो भवति। अत एव मुक्तिसाधनार्थमेव तस्या उपयोगः कर्त्तव्यो भवति।

**चौरङ्गिनाथः-** सिद्धये आवश्यकस्य तपसो विधिं तदवधिञ्च कथय भो गुरो !!

**गोरखनाथः-** तत्र विषयेषु वितृष्णः सन् बुभुक्षां पिपासाञ्च विजित्य एकस्मिन् लक्ष्ये ध्यानं विधेयं भवति। एवं निर्विघ्नः सन् द्वादशवर्षपर्यन्तं तपश्चरणीयं भवति। ईदृशेन सिद्धिसाधकेन तपसा समाधिना वा आत्मनो जनताया गुरुपद्धतेः कीर्तिरक्षायाश्च कार्यं भवति। (सिद्धेरीदृशेन विश्लेषणेन सन्तुष्टः प्रसन्नश्च नवयोगी तपस्यायामुत्सुको भवति। ततः निर्विघ्नस्य तपसः कृते समनुकूलं स्थानं तद्विधिञ्च पृच्छति गुरुं गोरखनाथम्।)

**चौरङ्गिनाथः-** भो गुरो ! तपसः समाधेश्च कृते किञ्चित् स्थानं पूर्वनिर्धारितं भवति ? स्वानुकूल्येन तत् निर्धारणीयं वा ?

**गोरखनाथः-** तपस्यायाः समाधिसम्पादनस्य च कृते किमपि निर्धारितं स्थानं न भवति, तादृशं स्थानन्तु जनाऽऽकुलमशान्तञ्च भवति। तादृशे स्थले तपसो निर्विघ्नता न भवति। अतः शान्तं निराकुलं प्रकृतिसम्पन्नञ्च तत् स्थलं स्यात्तपसे नवयोगिन् !!

**चौरङ्गिनाथः-** तर्हि तादृशं स्थानं क्व वर्त्तते ? भवतां कीर्तिरक्षायै नटराजमूलस्य योगानुष्ठानस्य निरन्तरतायै च तपस्या करणीया समाधिसम्पत्तिश्च समर्जनीया एव। तर्हि क्व गन्तव्यं तपसे गुरो !!

**गोरखनाथः-** न क्वापि गन्तव्यम्, यत्र वयं विश्रामं कुर्मस्तत्परिसरः प्राकृतिकसम्पन्नतासम्पन्नः सर्वसुविधायुक्तश्च। अत्र फलपुष्पजलाढ्यता दृश्यते। पक्षिणां सङ्कूजनं मनोहरं श्रूयते। पूर्वं जलानयनमपि त्वया कृतम्, तत्र प्राकृतिकी सम्पन्नता च दृष्टा भवेत्। अयमग्रे दृश्यमानः क्ष्माभृद्वरो वर्त्तते। तत्र तपसे विशाला गुहा अपि वर्त्तन्ते। अतस्तत्रैव तपश्चरणीयमिति मद्विचारः। प्रथमं भवान् तत्र तपस्तप्तुमुत्सहते ? अथ च गुरवोऽत्र विषये किं कथयन्ति ?



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**मत्स्येन्द्रनाथः-** स्थलमिदं तपसे उपयुक्तमेवेति प्रतिभाति मह्यमपि। अस्य खलु प्रादुर्भावोऽपि अस्याः कृष्णायास्तटे जातः। तपसः कृतेऽपि अस्याः परिसरोऽयमुपयुक्त एव।

(एवं तापसस्यानुकूल्यात् गुरोराज्ञया च चौरङ्गिणं सम्भावितं तपःस्थलं नयति, तत्र महत्तमां गुहां दर्शयति च। चौरङ्गी च तत् स्थलमनुमन्यते। गुरुश्च तं पद्मासने पूर्वाभिमुखं वासयति, तत्र शिलाशकलं प्रलम्ब्य तत्र दृष्टिविषयतां निरन्तरां शिक्षयति, प्रणान्नियम्य लक्ष्यस्य ब्रह्मणो ध्यानं शिक्षयति च। चौरङ्गिणमिदं कथयति)

**गोरखनाथः-** भो नवयोगिन्! तपसः प्रारम्भिके चरणे पिपासा बुभुक्षा च भवन्तं बाधिष्येते। तपसः स्तरस्योन्नयने तु ते जिते भविष्यतः तपस्यया। अजितावस्थायां फलानां जलस्य च व्यवस्था भविष्यतीति तदर्थं त्वया चिन्ता न कार्या। हिंस्रकजन्तूनामवरोधस्य व्यवस्थापि भविष्यति। अतो निश्चिन्तं समाधिस्थो भव। सफलायां तपस्यायां त्वं नवनाथेषु अन्यतमो भविष्यसि, सम्प्रदायश्च नवीनः प्रवर्त्तयिष्यसे। शुभास्ते तपःपन्थानः स्युः।

(चौरङ्गिणं समाधिं प्रारभयित्वा गोरखनाथो वनदेवीं ध्यायति प्रार्थयते च तां जलफलादिहेतवे।)

**गोरखनाथः-** भो वनदेवते! त्वं हि वनस्य वन्यानाञ्च अधिष्ठात्री वर्त्तसे। अतो मम शिष्यो नवयोगी परमलक्ष्यप्राप्तयेऽत्र भवत्याः साम्राज्ये तपस्यन् वर्त्तते। तपस्यायाः प्रथमे चरणे यत्र खलु बुभुक्षापिपासे तपो बाधिके भविष्यतस्तदापर्यन्तं जलफलानां व्यवस्था भवत्या सानुग्रहं करणीया। तपःस्तरस्योच्चतायान्तु जलफले अनावश्यके। तदा अनुग्रह एवावश्यक इत्यहं प्रार्थये।

**वनदेवी-** (आकाशवाणीरूपेणं) भो योगिराज! भवतः प्रार्थना मया श्रुता विषयवस्तु चावगतं मया। तपस्तत्साधितसिद्धिश्च न केवलं तापसस्य कृते भवति किन्तु समस्तस्य लोकस्य कृते तत्संग्रहाय भवति, समस्तोऽपि लोको निरोगो प्राप्तकल्याणश्च भवति। तत्र कर्मणि चोपकर्त्ता च तत्फलभागी भवति। अतः सत्कार्ये सर्वैः सहयोगः करणीय इति ममाप्याग्रहः। इदञ्च तथ्यं प्रमाणयितुमिदं कविवाक् स्फुरति मन्मनसि -

सम्भूय सर्वजनकैरथ सेवितानि,
दुष्कार्यतामपि गतानि सुखङ्कराणि।
तस्मान्निजोन्नतिविधौ परकीययोग-



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तस्योन्नतौ च निजयोग इतीह युक्तम् ॥
इत्यहं नवयोगिनः सफलतायै सर्वथा प्रयतिष्ये ।

**गोरखनाथः-** सत्यमुक्तं भवत्या । काननवराणि सन्तीति भवत्या ऐश्वर्यं दृश्यतेऽनुभूयते च भवदैश्वर्येण वनस्य रक्षणं सम्पदात्वञ्चेत्यन्योन्याश्रयता । अत्र तपस्यतः परिपालनं भावत्कं कार्यमिति तत्र सहयोगानुग्रहः कञ्चित् समयं यावज्जलफलयोर्व्यवस्थां पुनरनुरुन्धे ।

**वनदेवी-** योगिराजस्य कथनमवधार्य इदं प्रतिजानीते पद्यमयम्-

श्रीगोरखोक्तिपटुतामवधार्य देवी,
सर्वाङ्गभूषणविभूषितसुन्दरास्या ।
दृष्टा बभूव गुरुगोरखकार्यसिद्ध्यै,
योगिन् तवार्थितमहं सकलं प्रदास्ये ॥ इति ॥

**गोरखनाथः-** प्रणमामि मातस्तव चरणौ । वनमिदं भवत्याः साम्राज्यम् । अत्रत्या गतिविधीन् सर्वान् जानासि त्वम् । मातापि बालस्य रोदनेन विना स्तन्यं न पाययतीति तद्वत् मयापि भगवती तापससहयोगार्थमनुरुद्धा । अनुगृह्य मां उपस्थिता च मम शिष्यस्य साहाय्यं करिष्यस्येव ।

**वनदेवी-** सत्यां याच्ञायामसत्याञ्च पात्राय सहयोगदानं ममास्ति वैशिष्ट्यम् । इदमहमात्मनः कर्त्तव्यं मन्ये- पात्रे प्रदानम्, कस्याप्युपकारकरणम्, अज्ञस्य बोधनम्, रुग्णस्य रोगापनयनम्, सुकार्येषु कार्यकर्त्तुः सहयोगकरणञ्च विनैव याच्ञयापि कर्त्तव्यमिति । भो योगिन् ! सर्वमपि वनं मम भौतिकरूपमस्ति । अस्य मम भौतिकरूपस्य रक्षणं जनतया कर्त्तव्यमेव । योगिन् ! त्वं परिव्राजकोऽसि सर्वत्र भ्रमसि जनसम्पर्कान् करोषि । अतो योगस्य प्रचारेण सह वनसंरक्षणस्यापि प्रचारः कर्त्तव्यस्त्वया । वनभेदनं वृक्षच्छेदनञ्च ममैव नाशो बोधनीयस्तद्रक्षणञ्च मम पूजेति । वनसंरक्षणस्येदं संक्षिप्तं पद्यमयं प्रयोजनसूचकमवधेयम्-

एकेन चापि तरुणाथ तरन्ति लोकाः
पापात् क्षुधस्तपनकादपि दार्वभावात् ।
भूमेश्च साधु पतनादपि वारभावात् किं
काननस्य परिरक्षणतो न यत् स्यात् ? ॥ इति ॥

तरुभिस्तत्समष्टिभूतकाननैश्च जना धार्मिकाः सँसारतस्तरन्ति । तेऽन्ये च फलभक्षणेन क्षुधातः, छायोपयोगेन तपनकात्, दारुणां समुपलब्ध्या दार्वभावात्, भूस्खलनात्, जलस्रोतसः संरक्षणात्,



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राणवायूनां प्रदानाद् धार्मिककृत्येषु समिधां समुपलब्ध्या च वनसंरक्षणेन सर्वं भवति ।

**गोरखनाथः-** भगवति ! भवत्या साधूक्तम्, मम योगासक्ता स्मृतिर्वनसम्बन्धे नवीना सम्पादिता। मया योगस्य प्रचारणेन सह वनसँरक्षणस्यावश्यकतायास्तत्प्रचारस्य च कार्यं सम्पाद्यमेव। नैतदेव, इदमपि तथ्यं जनता प्रबोधनीया-अस्माकमारण्यकी संस्कृतिरपि वनेष्वाधृता वर्त्तते, तद्रक्षायै च वनरक्षणं कर्त्तव्यम्। विपुलानां दर्शनानां विविधधर्मस्वरूपाणां तपोविधीनां चावश्यका ग्रन्था अत्रैव लिखिता इति सर्वस्रोतोरूपं वनं रक्षणीयमेव। आर्षी ज्ञानलतिका अत्रैव प्रादुर्भूता रामायणादिस्रोतोग्रन्थानां लेखनमत्रैवाभूत्। वन्यौषधीनां समुपलब्ध्या अस्माकं जनस्वास्थ्यमायुर्वेदशास्त्रञ्च जीवतीति तद्रक्षणेऽपि ध्यानमस्माभिर्देयमेव।

**वनदेवी-** योगिन् ! मम स्मृतिपथे नागतमपि वनसम्बन्धि तथ्यं समुद्घाटितं तदर्थं योगिनो धन्यवादभाज एव। इदमपि तथ्यमवधेयं सर्वैः- योगिन् ! भवतां जन्मभूर्नेपालः पर्वतीयो देशः। अत्र उच्चावचा भूमयः समुच्चपर्वताश्च वर्त्तन्ते। ते हि आधिक्येन भूस्खलनभाज एव। भूकम्पस्यापि सम्भावना अधिका वर्त्तते नेपाल इति तद्रक्षार्थमपि वनसम्पदा रक्षणीया एव। अन्यथा दैव्यो विपदो जनान् नाशयिष्यन्ति। इदमप्यपरं वनानां महत्त्वं सूत्ररूपमवधेयम् -

नैपालकं हरितकाननमस्ति वित्तं
काष्ठादिवीरुधि सदैव हि तस्य वासः।
पाथःस्रवस्य विविधस्य हि रक्षणाच्च
तद्वित्तकं भवति रक्षणहेतु भूमेः ॥ इति

एवमनन्तानि फलानि वनसंरक्षणस्य वनरोपणरक्षणयोश्चेति जनता बोधनीया। इदमपि सा शिक्षणीया प्रशिक्षणीया च। रोपिततरूत्तमगुल्मशष्पैः स्वीयमूलैश्च तत्रत्यमृत्तिकानां रक्षणं भवति, तन्न ह्रसति। तेन भूसंरक्षणं भवतीति प्रत्येकजनेन वनरक्षणं वृक्षरोपणं तद्वर्धनञ्च विधेयमेवेति प्रचारणीयञ्च। तेन वनरक्षणे नवीन आयामः प्रवर्त्तितो भविष्यतीति हरितं वनं धनं भविष्यत्यपि भविष्यति।

**गोरखनाथः-** यथार्थं वनसंरक्षणं भगवत्या पुरः स्थापितम्। भगवत्या निर्देशः सम्यक् पालयिष्यते योगप्रचारणेन सह वनावश्यकताप्रचारणं मत्कृतमितो भविष्यति। मच्छिष्ये अनुग्रहः करणीयः।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

**वनदेवी-** साधूक्तं भवता योगिराजेन। तव शिष्यस्य संरक्षणं भविष्यति। भवतापि देशहितार्थं योगप्रचारणं वनरक्षणप्रचारौ चेतः परं कर्त्तव्यमेवेति। भवान् स्वकार्यार्थं यथेच्छं गच्छ। भवाँश्च -

यायावरोऽसि जनताहितकर्मनिष्ठो
योगान् प्रचारयसि पीडितरञ्जकोऽसि।
लोकाय योगविभवान् प्रददासि नित्यं
त्वं याहि चेहितदिशं त्वहमस्मि गुप्त्यै॥

(वनदेवीं प्रणम्य गुरुणा सह ततो निर्गच्छति गोरखनाथः। वनदेवी च तापसस्थितिं तत्परिसरञ्चावलोक्य समीक्ष्य च निर्गच्छति।

(नेपथ्ये)

(गच्छति काले चौरङ्गिणा च तपस्यायाः समाधेश्च स्तरान् पारयता तदर्थं द्वादशवर्षाणि यापितानि। तत्र सफलः सन् समाधिं समाप्य गुरुन् स्मृत्वा तानन्विष्य सम्प्राप्य च तान् प्रणमति। तेषामाशीर्वादेन स्वतपोजातसिद्ध्या च महान् साधको भवति। नवसु नाथसिद्धेषु चान्तर्भवति च सः।)

**गोरखनाथः-** (चौरङ्गिनाथः समागत्य गुरुं नमति) भो लब्धसिद्धिक चौरङ्गिन्! त्वमर्जिततपोबलोऽसि। इतः परं त्वं योगान् प्रचारय, जनसाधारणान् शिक्षय, तान् सन्मार्गे प्रवर्त्तय, वनसंरक्षणं बोधय त्वं पूर्वैरसम्पादितानि कार्याणि कुरु। अथ च नाथमार्गान् प्रचारय तद्घटकं नवीनं मार्गं प्रवर्त्तय। राज्ञानि राजानश्च सन्मार्गे प्रवर्त्तय। अन्यायपीडितान् न कोऽपि कानपि कुर्यात्। असाधारणी योग्यता जनसङ्ग्राहकता चार्जनीया। शुभास्ते योगपन्थानः स्युः।

**चौरङ्गिनाथः-** मारितप्रायोऽहं भवद्भिः समुज्जीवितवान्। भवतां योगिराजानां शिष्यतामङ्गीकृतवानस्मि, तत्रापि भवत्कृपया द्वादशवर्षाणि तपःसमर्ज्य तत्र साफल्यं समधिगतवान् वर्त्ते। मम बुद्धिवैभवेन प्रयत्नरत्नेन च स्वच्छेन मनसा सर्वं करिष्ये। अस्मद्गुरूणां परमगुरूणाञ्चानुग्रहः समभिलष्यते।

प्रवर्त्ततां राष्ट्रियगौरवोन्नतिः
सुमोदतां वैदिकधर्मसंस्कृतिः।
महीयतां प्रोन्नतसंस्कृतस्थिति-
र्विवर्धतां गोरखवर्त्मवल्लरी॥



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ततश्चौरङ्गी गुरुद्वयं प्रणम्य परिव्रजति। गच्छति काले स तपोबलेन सत्कार्येण च चन्द्रस्वरूपो जनानामाधिव्याधीनामुपचारको भक्तगताङ्गरोढा च बभूव। स जनेभ्यो विद्यां सुबुद्धिं चरित्रशक्तिं परिश्रमशीलताञ्च शिक्षयति स्म। स्वगुरुगोरखनाथवद् भक्तराजेभ्योऽङ्गचतुष्टययुतां ध्वजिनीं ददाति योगबलेन। नाथपथविस्तरणपूर्वकं पाङ्गूलः पाङ्गलः पाकल इति वा सम्प्रदायं प्रवर्त्तयन् असाधारणीं प्रसिद्धिं चुम्बति, नाथनवरत्नेषु चान्तर्भवति। जयतु योगः, जयन्तु योगिनः।)

सर्वे निष्क्रान्ताः। पटाक्षेपः।

समाप्तमिदं नाटकम्।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

## जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुईंटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9491-9-4
9 789937 949194